Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

की

को

।

न

त

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्ष 1993
नामित पुरस्कार के अन्तर्गत
कालिदास पुरस्कार हेतु
प्रस्तुत काव्य कृति -
इन्द्रधनुः

मु० यू०, १०६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इन्द्रधनुः

मुक्तककाव्यम्

प्रणेता

कविरत्नम् ओम्प्रकाशठाकुरः

एम०ए०, शास्त्री, साहित्याचार्यः

भारतसर्वकारस्य

वित्तसाहाय्येन

प्रकाशितम्

सुरभि-प्रकाशनम्

दिल्ली—११००३४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रकाशकम् : सुरभि-प्रकाशनम्
डी ७५७ सरस्वतीविहारः
दिल्ली ११००३४

© ओम्प्रकाश ठाकुरः :

पुस्तकप्राप्तिस्थानम् : विकास ठाकुरः
डी ७५७ सरस्वतीविहारः
दिल्ली ११००३४

संस्करणम् : प्रथमम्—१९९३ ई०

मूल्यम् : एकोनचत्वारिंशत् रुप्यकाणि (Rs. 39/-)

मुद्रक : नवीन प्रिंटर्स
ई-१५० कृष्णविहार
दिल्ली ११००४१

INDRA DHANUṢ. Lyrical poems in Sanskrit
By. OM PRAKASH THAKUR.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

विषयाः		पृष्ठाङ्काः
शुभाशंसनम्	डॉ० मण्डनमिश्राः	६
अभिमतम्	पं० अमीरचन्द्रशास्त्रिणः	७
ग्रन्थपरिचय	डॉ० रमाकान्तशुक्लाः	९
पुरोवाक्	ओम्प्रकाशठाकुरः	१५

१ स्तवनाञ्जलिः

१ गणपतिवन्दनम्	३
२ श्रीरामस्तवः	४
३ निनादय वंशीं हे घनश्याम!	६
४ कृष्णं वन्दे जगद्गुरुम्	८
५ वीणावादिनि ! वन्दे	११
६ वयं वन्दामहे	१३
७ तमसो मा ज्योतिर्गमय	१६

२ बालवाटिका

८ इयं वाटिका मे	२१
९ वयं विद्यालयं यामः	२३
१० भारतीय-मनीषा	२४
११ मूषक धाव	२७
१२ सन्मतिर्दीयताम्	२८
१३ स्वदेशगीतिः	२९
१४ चल तं देशम्	३०
१५ श्रमगौरवम्	३२

३ प्रबोधनम्

१६ श्रेयोवर्त्म परम्	३५
१७ जागरणगीतम्	३६
१८ प्रबोधवाणी	३९
१९ स्वदेशभक्तिः	४०
२० मौनखेदं मा भजेथाः	४२
२१ उद्बोधनम्	४६
२२ उद्बोध-गानम्	५३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२३ प्रेरणा ५६
२४ जीवनमधु ५८
२५ पर्यट विश्वम् ५९
२६ परिदेवितं सकलं वृथा ६२
२७ विज्ञानयुगीनं मानवं प्रति ६४
२८ उत्तिष्ठत जागृत हे आर्याः ! ६७
२९ पदं पुरः प्रवर्धताम् ६९
३० इतो निर्यात मधुवाताः ! ७०
३१ वितरामो मोदं जने जने ७२

४ प्रशस्तिपयस्विनी

३२ मानवगरिमा ७५
३३ जयतु भारतम् ७७
३४ भूमौ वीरवरा विजयन्ते ८०
३५ मदीयं ग्रामभारतम् ८२
३६ संस्कृतवाणी ८८
३७ संस्कृतभाषाष्टकम् ९६
३८ संस्कृतं भूतले राजतां भ्राजताम् ९८
३९ सुरभारती ९९
४० संस्कृतं राराज्यतां विश्वेऽखिले १०१
४१ कालिदासप्रशस्तिः १०४
४२ दयानन्दयतिवरो विजयते १०६
४३ वित्ते विनिवेशय चित्तम् १०८
४४ नाणकरणितम् ११०
४५ आशासुन्दरी ११४

५ समयाचारः

४६ अयि राष्ट्रदेवते! ११७
४७ तव जम्भे दध्मः १२०
४८ पञ्चाम्बुधरा १२३
४९ जिजीविषा १२५
५० भारतीया नारी १३१
५१ को नु विज्ञातुमर्हति १३५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५२ कलिकौतुकम् १३८
५३ पुरा यथा १४१
५४ किम् १४२

६ व्यङ्ग्यविलासः

५५ सर्वं कुशलम् १४५
५६ उदयन् सविता १४७
५७ गच्छति गन्त्री १४९
५८ वोटदेव ! नमस्तुभ्यम् १५२
५९ हे चाटुकार ! १५४
६० एकः साक्षात्कारः १५६
६१ अयि देवि महार्घते ! १५८
६२ को वेद किं वदानि ? १६०

७ प्रकीर्णपुष्पपरागः

६३ मनो मदीयम् १६३
६४ मुग्धं शैशवम् १६६
६५ प्रेयसि ! १६७
६६ धरा मे तदाऽस्ति रमणीया १६९
६७ ते हि नो दिवसा गताः १७१
६८ कथमास्ते मे प्रियदेशः १७३
६९ संस्कृतिगङ्गा १७६
७० यामि कमधुना शरणम् १७९
७१ बाणभारती जयति १८१
७२ गेहं प्रत्यानयते ३८४
७३ भातु वसुधा भारती १८६
७४ आद्यं धर्मसाधनम् १८८
७५ जगदीशवन्दना १९०

—•←

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनारतं सुरभारतीसमर्चापराणां विद्वद्वरेण्यानां श्रीलालबहादुर-शास्त्रीराष्ट्रियसंस्कृत विद्यापीठस्य कुलपतीनां डा० मण्डनमिश्र-महाभागानां

शुभाशंसनम्

कविरत्नस्य श्रीमतः ओम्प्रकाशठाकुरमहोदयस्य प्रतिभाप्रकर्षस्य द्योतकम् 'इन्द्रधनुः'-संज्ञकं मुक्तककाव्यसंकलनं सुरभारतीभाण्डागारस्य देदीप्यमानं विशिष्टं रत्नं वरीवर्ति । रागसप्तकसमन्वितमिदम् इन्द्रधनुःसंज्ञकं काव्यरत्नं बहुविधान् विषयान् प्रकाशयते । अत्र काव्यसंग्रहे बहवो वियथास्तु सर्वथा नवीनाः सन्ति, यैः पूर्वेषां संस्कृतसुकवीनां प्रतिभासंस्पर्शो नैव लब्धः । 'अयि देवि महार्घते' प्रभृतिशीर्षकविशेषैर्विभूषितानां कवितानां पाठावसरे श्रीठाकुरमहोदयस्य लोकानुभवप्रकाशनकौशलं सविशेषं प्रकाशते । सर्वत्रैवास्मिन् काव्यकदम्बके कविवरेण्यस्य श्रीठाकुरमहोदयस्य प्रतिभाप्रकर्ष-विशेषो दरीदृश्यते । अत्र प्रायशो मात्रिकच्छन्दसां प्रयोगः काव्यसंकलनं सविशेषं भूषयति । सर्वत्रैव छन्दःपरिग्रहे विषयानुकूलत्वं विराजते । अहं मन्ये यदनेन काव्यसंकलनेन सुरभारतीभाण्डागारस्य विशिष्टा श्रीवृद्धिः सम्पद्येत । श्रीमत ओम्प्रकाशमहोदयस्य संस्कृतसुकविसमाजे विशिष्टा प्रतिष्ठा वर्तते । संस्कृतसंस्कृतिप्रचारप्रवणेनानेन सुधिया भारतराजधान्यां सांस्कृतिक-चेतनाप्रसारे सविशेषं योगदानं विहितम् । भगवन्तं परमेश्वरं प्रार्थये यत् ठाकुरमहोदयश्चिरं जीव्यात् तथा चास्य सारस्वतसाधना सततं प्रसरेत् ।

वसन्तपंचमी

२०४९ विक्रमाब्दः ।

डा० मण्डनमिश्रः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कविशिरोमणीनां नैकशास्त्रपारदृश्वनां गीतिकादम्बर्यादिग्रन्थप्रणयन-लब्धयशसां श्रीमताम् अमीरचन्द्रशास्त्रिणाम्

अभिमतम्

कविरत्नेन श्रीमता ओम्प्रकाशठाकुरमहाभागेन सामान्येन संस्कृतकविभिः पिङ्गलादिच्छन्दोग्रन्थेषूक्तानि च्छन्दांसि समालम्ब्यापि काव्यं क्रियते, किन्तु हिन्दीसाहित्ये स्वीकृतानि कानिचित् प्राचीनच्छन्दोलक्षणानुगतानि नूतनान्यागृह्यमाणानि च्छन्दोलक्षणानि समादृत्य विशेषेण गीतरचनायामादरो दर्श्यते। सद्य एवास्य गीतिमञ्जरीति नाम्ना षट्त्रिंशद् गीतानामेकः सङ्ग्रहः पकाशमुपगतः। अपरस्तावदयम् इन्द्रधनुः नाम्ना पञ्चसप्ततिगीतानां सङ्ग्रहः प्रकाश्यतेत।

संस्कृतसाहित्ये च्छन्दस्वत्याः सरस्वत्याः पाठ्य-गेयभेदेन रूपद्वयं प्राचीनतमात् कालात् प्रतीतिमुपगतं विद्यते। ऋचां पाठवत्त्वं साम्नां गेयत्वञ्चात्र प्रमाणम्। पुराणेतिहाससाहित्येऽपि तदिदं रूपद्वयं सुनिरूपम्। यथा श्रीमद्भागवते प्रसिद्धान्येव वेणुगीत-युग्मगीत-गोपीगीत-भ्रमरगीत-भिक्षुगीत-भूमिगीत इन्द्रगीतादीनि नैकानि गीतानि। कालिदासादिकविपुङ्गवैर्विरचितानां मेघदूतादीनां दूतकाव्यानामपि गीतिकाव्येतिसंज्ञानं सुविश्रुतम्। जयदेवकवेर्गीतगोविन्दम्, प्रबोधानन्दसरस्वतीपादस्य संगीतमाधवम्-इत्यादीनि संस्कृतपारम्परीणानि सुविदितान्येव गीतिकाव्यानि।

मञ्जुनाथापरपर्यायेण श्रीमथुरानाथभट्टेन हिन्दीकाव्येषु प्रयुक्तानि घनाक्षरी प्रभृतीनि च्छन्दांसि समाश्रित्य भूयांसि संस्कृतगीतानि विरचितानीति नाविदितम्। ममापि गीतिकादम्बरी परम्परामेनामनुगता। तस्मिन् गेयपाठ्योमयविधच्छन्दोभेदनिबद्धानां द्वादशग्रन्थानां सङ्कलने प्रथमो गीतिकादम्बरी। यत्र मम पञ्चवर्षदेशीयया कन्यया कादम्बर्या गातुमुपारब्धानां त्रिपञ्चाशद् गीतानां सङ्ग्रहः, तन्नाम्नैवास्य ग्रन्थस्य नाम गीतिकादम्बरीति व्यपदिष्टम्। अस्मिन् सङ्कलने सङ्गीतवृन्दावनं नाम महाकाव्यं त्रिंशत्सर्गात्मकं गीतगोविन्दपद्धतिकं सङ्गीतमाधवपद्धतिकं वा वर्वर्ति। तस्मिन् नानावृत्तमय पद्यनिबन्धने महाकाव्ये स्थाने स्थाने गीतान्यपि निवेशितानि सन्ति मुक्तककाव्यानि, खण्डकाव्यानि काव्यानि महाकाव्यानि च।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमतोऽस्य कविरत्नस्य तु द्वावपीमौ गीतसङ्ग्रहौ मुक्तकप्रकृतिकौ। हालस्य गाथासप्तशती, गोवर्धनस्यार्यासप्तशती, बिहारीलालस्य सततई चेत्यादीनि मुक्तकान्यपि प्रबन्धायमानानि सन्ति। श्रीठाकुरस्य मुक्तकानि तावच्छुद्धमुक्तकान्येव। न तत्रास्ति प्रबन्धाभासस्यापि सम्बन्धः। भर्तृहरेः शतकत्रयं, भोजराजस्य शृंगारशतकञ्चेत्यादीनां शुद्धमुक्तकानामपि व्याख्यातृभिर्मध्ये मध्येऽवतरणिकानिवेशनेन प्रबन्धायमानत्वमिव प्रकल्प्यते। किन्तु कविरत्नस्यास्य गीतानि मुक्तकान्येव न प्रबन्धगन्धं सहन्ते।

तद्गीतसङ्ग्रहस्य प्रथमभागे गीतिमञ्जर्यां पर्यालोचनेन तुलसीमञ्जरीसौरभ्यमनुभूयते। नूनमियं तुलसीव पवित्रा, भक्तिप्रदा च। देवभक्त्या, राष्ट्रभक्त्या, मातृभूमिभक्त्या, जीवभक्त्या चेयमनुप्राणिता। तुलसीव चेयमपि प्रत्यर्पितदीपागीता 'दीपशिखा' 'प्रदीपो विभाति' इति दीपभ्याम्। प्रणेयप्रणेत्रो र्गीतिमञ्जरी-कविरत्नयोरेष तुलसीठाकुरयोरिव प्रणयसम्बन्धोऽपि कृतेरस्यास्तुलसीमञ्जरीसावर्ण्यमनुरुणद्धि। कस्याश्चित्तुलस्याः सुरूपाया इवास्या मञ्जर्याः षट्त्रिंशच्छाखतां विभावयतां षट्त्रिंशद् गीतानां मध्ये केषाञ्चित् द्वित्राः अन्येषां त्रिचतुराः, परेषां चतुः पञ्चाः इतरेषां पञ्चषाः अपरेषां च षट्सप्ताः खण्डा अपि तुलसीदलौपम्यं वहन्तो रुजमिव संस्कृतारुचिमपहरन्ति, ज्वरविरामजन्यं प्रसादं च सेवमानानामावहन्तीत्यपि तुलसीसाम्यसमर्थकम्।

द्वितीयो भागस्तु नूनं सहकारमञ्जरीमञ्जुलः। यत्र प्रतिकोषमिव प्रतिगीतं रसश्च्युतिः, सौरभ्यविततिः, भृङ्गझङ्कृतिश्चानुभूयते। श्रीहर्षचरितस्य

'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु
प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते'

इत्युक्तिर्नूनमस्य कविरत्नस्यापि गीतिमयीषु सूक्तिषु याथार्थ्यमेति। अयमस्य कविरत्नस्य चिरन्तनकवि वाल्मीकि-व्यास-भास-कालिदासादिसमर्जितं यशो नूतनकविजयशङ्करप्रसाद-निराला-पन्तादिसमर्जितां लोकप्रियतां च कामयमानः सौभाग्यहीनजनदुर्लभं श्रीराधावल्लभं भगवन्तमभ्यर्थयते

अमीरचन्द्रशास्त्री

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थ-परिचय

कविरत्न श्री ओम् प्रकाश ठाकुर संस्कृत-सहृदय-समाज के लिए सुपरिचित हैं। विगत दो दशकों से विभिन्न पत्रिकाओं में प्रकाशित आप की रचनाओं को पाठक पढ़ते रहे हैं। मुझे देववाणी परिषद्-दिल्ली, दिल्ली संस्कृत अकादमी, इन्द्रप्रस्थीय संस्कृत परिषद् तथा अन्यान्य मंचों पर कविरत्न जी के काव्य पाठ का आस्वाद लेने का अवसर मिला है। गत वर्ष आप की 'गीतिमञ्जरी' के आरम्भ में दो शब्द लिखने का भी मुझे सौभाग्य मिला था। वहां मैंने संस्कृत माध्यम से आप के और आप की रचनाओं के विषय में संक्षिप्त चर्चा की थी। इसी बीच आप का नवीन काव्य-संग्रह 'इन्द्रधनुः' मुद्रित होने लगा। यह ग्रन्थ सहृदय पाठकों के करकमलों में आने को तैयार हैं। यहां कुछ पंक्तियों में 'इन्द्रधनुः' की संवेदना और शिल्प की संक्षिप्त चर्चा करना मेरे लिए सुखद अनुभव है।

कविरत्न ओम् प्रकाश ठाकुर का 'इन्द्रधनुः' ७५ कविताओं का संकलन है। इन कविताओं का रचनाकाल १९८४ से १९९२ के बीच का है। इन ७५ कविताओं को सात भागों (रागों) में विभक्त किया गया है—१. स्तवनाञ्जलिः, २. बालवाटिका, ३. प्रबोधनम्, ४. प्रशस्तिपयस्विनी, ५. समयाचारः, ६. व्यङ्ग्यविलासः, तथा ७. प्रकीर्णपुष्पपरागः। इन सातों रागों में विभक्त रचनाओं में कवि का विविध आयामी रचना-संसार समाहित है।

'स्तवनाञ्जलिः' में संकलित सात रचनाओं में प्रथम 'गणपतिवन्दनम्' है। कवि काव्यारम्भ में मानों विघ्नविघात के लिए मङ्गलाचरण ही कर रहा है—

एकदन्त गजवदन विलक्षण !
विघ्नविनाशनकर्मविचक्षण !
सहजकृपालुतया कृतरक्षण !
शरणं त्वामायामि
गणपतिदेव ! नमामि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरल पदावली, अन्त्यानुप्रास की छटा, गेयता तथा प्रासादिकता— कविरत्न जी की रचनाओं की ये सभी विशेषताएं ग्रन्थारम्भ से ही दृष्टिगत होने लगती हैं। भारतीय संस्कृति के भावात्मक पक्ष के प्रति आपके अनुराग की व्यञ्जना आरम्भ से ही होने लगती है। यदि इन रचनाओं को संगीतबद्ध करके प्रस्तुत किया जाए तो निस्सन्देह ये मन में, भक्तिभावना का संचार करने वाली लगेंगी। 'श्रीरामस्तवः' में श्रीराम की महिमा के गान के साथ दुरितनाश और मंगलविधान की प्रार्थना की गई है। लगता है, प्रभु श्रीराम को भक्त सामने देख रहा है और कह रहा है—

हे परमसुहृद् हे करुणेश्वर !
सकलातिशमन हे दीनोद्धर !
हर हरे ! सकलदुरितं त्वरितं !
उपनय मे यच्च भवेद् भद्रम्। (पृ० ५)

श्रीराम के लोकरक्षक रूप के वर्णन के अनन्तर कवि के मन में श्रीकृष्ण के वंशीवादक लोकरञ्जक रूप की छवि उभरती है। रचना की प्रथम पंक्ति से ही कवि श्रीकृष्ण की इस छबि को रूपायित करने लगता है—

निनादय वंशीं हे घनश्याम !

और अन्त में सूर, बिहारी आदि की शैली में प्रार्थना करता है—

कति नो भवसागरतो भवता
कृष्ण कृपालो ! पारं गमिता
मामप्युद्धर विगतविवेकं
प्रणत - हृदयविश्राम ! (पृ० ७)

चतुर्थ रचना 'कृष्णं वन्दे जगद्गुरुम्' में श्रीकृष्ण के महिमागान के साथ अपने उद्धार की प्रार्थना की गई है—

महिमा माधव ! पारे वाचां
त्वं त्वन्मनीषितं जानीषे
शास्त्राणि मौनमालम्बन्ते
वेदासो यं त्वं वेदयसे
स्रष्टा त्वं नवलक्रान्तीनाम्
अपहर्ता सकलभ्रान्तीनाम्
उपदेष्टा मानसशान्तीनां
त्वमुदयशैलो नवकान्तीनाम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे विश्वरूप हे योगेश्वर !
वंश्या मधुमय्या शोभितकर !
गीतामृतपानाप्यायितनर !
सुन्दर नटबर ! मामप्युद्धर ।

कैसी सरल, सरस अभिव्यक्ति है। कैसा नैसर्गिक पदान्तग और पादान्तग अनुप्रास है।

पांचवीं रचना 'वीणा वादिनि ! वन्दे' पं० सूर्यकान्त त्रिपाठी निराला की प्रसिद्ध रचना 'वरदे वीणावादिनि वरदे' को छन्द और शैली की दृष्टि से सहृदयों के मन में लब्धास्पद कर देती है। गतिमयता, प्रासादिकता और माधुर्य के साथ हृदय के भावों का सहज उच्छलन इस रचना की विशेषताएं हैं—

वितर वितर मयि देवि कृपामयि !
तव पदाब्जरतिमविचलभावां
तत्प्रसरत्सौरभपरिपूर्णं
प्राङ्गणमखिलं विलसतु जगतां
तन्मयतामुपयातु समस्तं
वीणायास्ते क्वणितेऽमन्दे। (पृ० १२)

'तमसो मा ज्योतिर्गमय' में परमेश्वर से राह दिखाने की प्रार्थना की गई है-

आलम्बनहीनान् नस्तारय
कृपया कृपादृशं विस्तारय
ज्योतिस्ते हृदये समुदेतु
गाढनिलीनतमो लयमेतु (पृ० १८)

'स्तवनाञ्जलिः' की वन्दनापरक रचनाओं को ईश्वर के सगुण और निर्गुण दोनों रूपों के अनुरागी बड़े भाव से पढ़ और गा सकते हैं। कवि की रचना उसकी लेखनी से प्रसूत होने पर केवल उसकी ही नहीं रह जाती, वह सहृदय की भी हो जाती है। कविरत्न जी की ये भक्तिपरक रचनाएं साधारण संस्कृत जानने वाले आबालवृद्ध नर-नारी को आनन्द देने वाली हैं।

द्वितीय राग 'बालवाटिका' में आठ कविताएं हैं, जो बच्चों के लिए लिखी गई हैं। संस्कृत में बाल साहित्य की आवश्यकता रेखांकित करने वाले समीक्षकों

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

को ये अवश्य पसन्द आएंगी। इन रचनाओं को पहली दूसरी कक्षाओं के बच्चे भी मामूली अभ्यास से याद कर सकते हैं। मैं तो उन रचनाओं को सफल मानता हूं जो आबालवृद्ध के कण्ठ में जल्दी बैठ जाएं। यह क्षमता कविरत्न ठाकुर जी की रचनाओं में मुझे आद्यन्त दिखाई दे रही है। 'मूषक घाव' कविता को खेल अथवा अभिनय में भी प्रयुक्त किया जा सकता है। 'स्वदेशगीतिः और 'चल तं देशम्' राष्ट्रीय भावना जगाने वाली रचनाएं हैं।

तृतीय राग 'प्रबोधनम्' की १६ कविताओं में समकालीन समाज को विभिन्न परिस्थियियों में प्रबोधित किया गया है। कहीं कवि मनुष्य को अध्ययन की प्रेरणा देता है (पृ० ३५), तो कहीं वर्तमान दुःस्थिति से देश को उबारने की कवि को प्रेरणा देता है (पृ० ३६-३८)। कवि का मधुमय गीत गाने वाले कविबन्धु से कथन है—

भूयान् समयो हे कविबन्धो !
गातुं मधुमयगीतं
वर्तमानमवचिन्तय तावत्
स्मर मा स्वर्णमतीतम्
आतङ्को नित्यं नवखेलाम्
अङ्गाणवेद्यां तनुते
क्रौर्यतूलिका क रो ऽह नि शं
दिशः शोणिताः कुरुते
राजनीतिरबलेव लोकते
मानवताया घातं
नवलवधूरिव विनयविनम्रा
तन्वाना प्रणिपातम्
अद्य लेखनीं कुरु करवालं
जहि यद् दुरितपरीतम्। (पृ० ३७-३८)

'प्रबोधवाणी'—रचना में कवि भौतिक वस्तुओं में सुख की अनुपस्थिति और परोपकार में सुख के दर्शन करता है—

परसेवाव्रतमिह नाचरितं
मन्ये जन्म वृथा नीतं
निर्बलजनरक्षा नो विहिता
किं वीर्यं पुण्यं विचितम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मा मृगयेस्त्वं शशकविषाणं
भौतिकवस्तुनि नैव सुखम्
आराधय जगतां प्रभुमेकम्
आचर जनहितकर्म शुभम् । (पृ० ३९)

'स्वदेशभक्तिः'—में कवि कहता है कि यदि देश प्रेम से मन न रंगा तो वैभव और कला-कौशल से क्या लाभ ?

वैभवैस्तेऽपि किं किं कलाकौशलैः
देशरागेण चेतो न चेद् रञ्जितम् ।

जो लोग भोली भाली जनता की खिल्ली उड़ाते हैं, और विदेशी वस्तुओं के मोह में पड़े रहते हैं, उनको धिक्कारता हुआ कवि कहता है—

हेलया हन्त तस्यां त्वया हस्यते
... ...
यद् विदेशे भवं रम्यमेवाखिलं
धिक् त्वदीयं मनो दास्यसम्पीडितम् । (पृ० ४१)

'प्रबोधनम्' की अधिकांश कविताएं राष्ट्रीय चेतना को जगाने वाली है । किसी में विज्ञानगर्वित मानव को चेतावनी दी गई है और कहीं सारी दुनियां को खुशी बांटने का आवाहन किया गया है ।

चतुर्थ राग 'प्रशस्ति-पयस्विनी' में मानव, भारत भूमि, संस्कृतवाणी, कालिदास, स्वामी दयानन्द, धन तथा आशा की प्रशस्ति गाई गई है । 'संस्कृतवाणी' में संस्कृत वाणी स्वयं अपना परिचय देती है । कुछ वर्ष पूर्व 'अर्वाचीन संस्कृतम्' में यह कविता प्रकाशित हुई थी। 'इन्द्रधनुः' में इसके पुनः प्रकाशित होने पर कवि ने इसमें कुछ परिवर्तन और परिवर्धन भी किया है जिससे संस्कृत के वैभव के कुछ और आयाम इसमें जुड़ गये हैं । कवि ने संस्कृत के मुख से कहलाया है कि वह राजाश्रय के बिना भी प्रभु की कृपा से सर्वत्र आदरणीय है तथा आत्मबल से दीप्त है—

राजाश्रयमनपेक्ष्यापि विभोः
कृपया सर्वत्राद्रियमाणा
... ...
सम्प्रत्युपेक्ष्यमाणा लोकैः
भौतिकताया दीप्त्या मुग्धैः
अपचीयमानसर्वावयवा
जीवामि हन्त किं नात्मबलैः । (पृ० ९१)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चम राग 'समयाचारः' की ९ रचनाओं में कवि ने देश की वर्तमान दुःस्थिति पर क्षोभ प्रकट किया है। देशवासियों को देश के लिए कुछ भला करने की व्यंजनया प्रेरणा दी है।

षष्ठ राग 'व्यङ्ग्यविलासः' की आठ कविताओं में मर्यादा हीनता, संस्कृति-लोप, रिश्वतखोरी, नेतृजन, आतंकवाद, गरीबमार, वोटवादी राजनीति, चाटुकार, बेरोजगारी, महंगाई आदि से सम्बद्ध भाव व्यक्त किए गये हैं।

सप्तम राग 'प्रकीर्णपुष्पपरागः' की १३ रचनाएं मन, भोला बचपन, प्रेयसी, जन्मभूमि, भारत के खोए स्वर्णिम अतीत, वर्तमान दुर्दशा, भारतीय संस्कृति, संस्कृत की चिन्ता, बाणभट्ट की वाणी, आरोग्य तगा जगदीश वन्दना से सम्बद्ध हैं गेहं 'प्रत्यानयते'—रचना में कवि ने कहा है कि वह उस का उपकार मानेगा जो भारतमाता के भटके हुए पुत्रों को अपने घर के प्रति स्नेहशील बना दे—

उपकारं तस्य परं मंस्ये
स ममादरभाजनतामयते
यो भारतमातृसुतान् भ्रान्तान्
नैजं गेहं प्रत्यानयते।

कवि का यह कथन आज के भारत के लिए नितान्त प्रासंगिक है। मङ्गलाचरण से प्रारम्भ हुई इस कृति का समापन भी 'जगदीशबन्दना' रूप मङ्गलाचरण से हुआ है। आज के युग के आदमी से कोई क्या मांगे ? इस स्थिति में केवल प्रभु की ही कृपा की आकांक्षा की जा सकती है।

कृपां केवलां ते वाञ्छामः। (पृ० १९१)

मैं 'इन्द्रधनुः' के प्रणयन के लिए कविरत्न ओम् प्रकाश ठाकुर का अभिनन्दन करता हूं। आशा है इनके साहित्यिक प्रयास जन-जन तक पहुंचेंगे। संस्कृत जगत को श्री ठाकुर से अभी और आशाएं हैं। यह आशा वस्तुतः प्रेरणा देने वाली है। कवि के ही शब्दों में—

आशे ! त्वं कं नो प्रेरयसे
प्रेषयसे वा कर्मपथे

हमारी आशा सफल हो।

डा० रमाकान्त शुक्ल

महाशिवरात्रि २०४९ वि०, महासचिव देववाणीपरिषद्, दिल्ली
आर ६, वाणी विहार, नई दिल्ली ११००५९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरोवाक्

सुरभारतीसमर्चकानां सहृदयपाठकानां पुरस्तात् 'इन्द्रधनुः' नाम मुक्तककाव्यकृतिं प्रस्तुवतो मे मनो हर्षस्य परां कोटिमाटीकते। विगतदशके समये समये या अनुभूतयः प्रास्फुरन्, ता एव गीतेषु कवितासु वा परिणता अभूवन्, 'गीतिमञ्जरी'-'इन्द्रधनुः'-काव्ययोः समावेशमाप्नुवंश्च।

प्रावृषि कदाचन इन्द्रधनुष आविर्भावस्तत् पश्यतामाबालवृद्धानां मनांसि रञ्जयन् प्रकृतौ सौन्दर्यसृष्टिं विदधाति, तद्वत् सप्तरागानुरञ्जितं काव्यमिदं सहृदयमनोरञ्जनं विदधत् संस्कृतसाहित्यजगति सौन्दर्यचेतनां जनयेदिति तन्नामहेतुः।

सङ्गीते छन्दःशास्त्रे वा न मया किमपि विशिष्टमध्ययनं व्यधायि, किन्तु बाल्यादेव वाद्यसङ्गीतश्रवणे नानाच्छन्दोग्रन्थिते गीतमये काव्ये च रुचिमानहं स्वलेखने गीतविधामूरीकृतवान्।

यद्यपि चतुष्पादमये वर्णिकच्छन्दोलक्षणानुगते विपुलतरे संस्कृतकाव्यकदम्बे गीतितत्त्वं सर्वत्र विराजत एव। किन्तु हिन्द्यादि कविभिः समादृतां लोकप्रियतां गतां गानशैलीमाश्रित्य विरचिता रचनाः संस्कृते नाधिकाः। जनप्रेषणीयतायां माध्यमरूपेण गीतस्य महत्त्वं नाविदितं विदुषाम्। संभवत एतां दृष्टिमवष्टभ्य मात्रिकच्छन्दसां गीतानुकूलतां निरीक्ष्य गीतलेखनेऽहं पार्वतिषि वार्णिकानि च्छन्दांसि भावप्रकाशने कमपि गतिरोधमुपजनयन्तीति कृत्वा मात्रिकवृत्तेषु कृतप्रणयोऽहम्। सन्धिसमासादिभिः कठिनबन्धा पदयोजना गेयतां व्याहन्तीति विचिन्त्य सरला सरसा संगीतमयी कमनीया पदावली काव्येऽत्र विवेशिता पाठकांश्चेतावर्जयति, प्रयासमिमं सफलं मन्ये।

कमपि गीतलयमाधृत्य रचितेषु गीतेषु नैके विषया अत्रगृहीताः सन्ति। तेषां चर्चाऽपि मान्यैः समीक्षकवर्यैः भूमिकाभागे कृताऽस्ति।

अहं राष्ट्रियसंस्कृतसंस्थानं प्रति स्वीयमाभारं व्यनज्मि, येनास्याः काव्यकृतेः प्रकाशनार्थे वित्तसाहाय्यं वितीर्यानुगृहीतोऽस्मि।

परमश्रद्धेया डा० रामकरणशर्माणो ममाभिवन्दनीयाः सन्ति यैः काव्यमिदं श्रुतं पठितमभिनन्दितञ्च।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमसम्मान्याः श्रीलालबहादुरशास्त्री राष्ट्रिय - संस्कृत - विद्यपीठस्य कुलपतयः डा० मण्डनमिश्रमहाभागा मे धन्यवादमार्जः, यैः व्यस्ते कार्यक्रमेऽपि काव्यमिदं विलोकितं, स्वीयैराशीर्वचोभिः समलङ्कृतञ्च ।

अनारतं सुरसरस्वतीसमाराधनपरा माननीया आचार्यवराः कविरत्नम् श्रीअमीरचन्द्रशास्त्रिणः, अथ च देववाणीपरिषदो महासचिवाः कविवर्या डा० रमाकान्तशुक्लमहाभागा मम वन्दनीयाः सन्ति, यैरस्याः कृते विस्तृतं विवेचनं व्यधायि ।

विद्वन्मूर्धन्यानां श्रीशिवनारायणशास्त्रिमहाभागानामुदारं सहयोगं विना काव्यस्यास्य रमणीयं स्वरूपं नासीत् सम्भवि । तान् प्रत्यहं भूयः कृतज्ञतां वहामि ।

परमसम्मन्या बन्धुवना डा० सत्यदेवचौधरीमहाभागा सुहृद्वराः श्रीश्रीकृष्ण-सेमवालमहोदयाश्च मुहुरभिनन्दनीयाः सन्ति, येषां प्रेरणाः सत्परामर्शाश्च मम पाथेयत्वायाकल्पन्त ।

सहधर्मिण्याः श्रीमत्या जानकीदेव्या औदार्यं प्रतिपदसुलभः सहयोगश्च कथं विस्मर्तुं शक्येते ? तया हि गृहव्यापारानुज्झित्वा अध्ययने साहित्यिकगोष्ठीषु वा व्यापृते मयि सर्वा गृहव्यवस्था समुदमकारि क्रियते च । तस्यै बहून् धन्यवादान् वितरामि ।

'नवीन प्रिंटर्स'-अध्यक्षेण श्रीभगवानदास यादवमहाभागेन मुद्रण कर्मणि दत्तं सहयोगं हृदाऽभिनन्दामि ।

गृहे गृहे संस्कृतवाण्याः प्रचारं प्रसारं चाभिवाञ्छन् भगवत्या वाग्देवतायाः प्रसादं कामये—

नवशब्दार्थदीप्त्या या
सम्पृणात्यखिलं जगत्
देव्यै तस्यै सरस्वत्यै
कृतिमेतां समर्पये ।

विदुषामाश्रवः

बसन्तपञ्चमी, २०४९ वि० ओम् प्रकाश ठाकुरः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रथमो रागः

स्तवनाञ्जलिः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१. गणपतिवन्दनम्

गणपतिदेव ! नमामि

ऋद्धिसिद्धिविद्यानामालय !
शरणागतवत्सल करुणामय !
हे मङ्गलमय गिरिजानन्दन !
भक्त्याऽहं प्रणमामि । १

एकदन्त ! गजवदन विलक्षण !
विघ्नविनाशनकर्मविचक्षण !
सहजकृपालुतया कृतरक्षण
शरणं त्वामायामि । २

प्रियमोदक ! मोदानां दाता
विकटसंकटेभ्यस्त्वं पाता
प्रथमतया पूजित गणनायक ।
त्वामनिशं ध्यायामि । ३

प्रणतेभ्योऽभीष्टानि ददासि
दीनानार्तजनान् परिपासि
तमःसन्ततौ परिपतिते मयि
करुणदृशं वाञ्छामि । ४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२. श्रीरामस्तवः

पदकमलं ते विश्रामधाम
हे राम ! जायतां मे मनसः
हृदि वाचि लसतु ललितं मधुरं
भवतापहरं तव नाम सदा । १

अवधीरितपीयूषं भवतः
सुखदं मङ्गलभवनं चरितं
भौतिकभावार्पितमनसे मे
रोचेत ललितलीलाभरितम् । २

न च यत्र गतिर्वचसां काचित्
यस्मिंश्च मनो विहतप्रसरं
युक्तैरनुभूतिपथोपेयं
वन्दे प्रणतस्तत् तत्त्वमहम् । ३

यद्वन्नैकाः सरितां धाराः
पारावारं शरणं यान्ति
तद्वन्निचया ब्रह्माण्डानां
भगवंस्ते विपुलतनौ मान्ति । ४

कवयस्ते लोके वन्द्यतमा
गीतो यैस्तव पावनमहिमा
भुवि जागरिताऽभयविश्वासा
वल्मीकभवास्तुलसीदासाः । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तव कथाश्रवणरसिकान् वन्दे
नवलीलारसमधुपान् वन्दे
तृप्यन्ति न येषां चेतांसि
नेहन्ते जगतां प्रेयांसि। ६

भूमौ जलधौ गगने विततं
रवि-शशि-ताराणां किरणगतं
द्रष्टुं सौन्दर्यमपूर्वविधं
श्रीराम! वितर मे दिव्यदृशम्। ७

गर्त्ताः खातान्युच्छ्रितशैलाः
बाधाशतकं मोहप्रभवं
श्रीराम! तवालम्बनहीनो
दीनोऽहं त्वामुपयामि कथम्। ८

येष्वनुकम्पादृष्टिर्भवतः
धन्यांस्तान् समेऽनुकम्पन्ते
नहि वैरपरः तेषाँल्लोके
श्रीभिः सुतरां संसेव्यास्ते। ९

हे परमसुहृद् हे करुणेश्वर!
सकलार्तिशमन हे दीनोद्धर!
हर हरे! सकलदुरितं त्वरितम्
उपनय मे यच्च भवेद् भद्रम्। १०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. निनादय वंशीं हे घनश्याम !

निनादय वंशीं हे घनश्याम !
रसमयतामुपयातु समस्तं
मतिरपि भेदवती यात्वस्तं
चेतसि सुखकलिकैतु विकासं
व्रजनन्दन सुखधाम ! १

भासस्तव भानुं भासयते
कान्तिकणैर्हिमरश्मिरुदयते
वितरसि नक्षत्रेषु विभासम्
अनुपमशोभाधाम ! २

अपसारय मम सकलां भीतिं
निर्दह कलुषकुलेमें प्रीतिं
शिक्षय मां तव पदरतिरीतिम्
अयि माधव अभिराम ! ३

रूपसुधारसपानसतृष्णं
यातु चकोरत्वं मे नयनम्
इममभिलाषं पूरय सुन्दर !
शोभार्तजितकाम ! ४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मोहन ! तव माया मोहयते
त्वत्सान्निध्याद् दूरे नयते
जहि मम मोहमयं रिपुकंसम्
आर्त्तविपत्तिविराम ! ५

कति नो भवसागरतो भवता
कृष्ण कृपालो पारं गमिताः
मामप्युद्धर विगतविवेकं
प्रणतहृदयविश्राम ! ६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. कृष्णं वन्दे जगद्गुरुम्

श्रीकृष्ण परात्पर योगेश्वर ।
भक्त्या विनतास्त्वां प्रणमामः
चरितं तव जगदुपकारकरं
स्मारं स्मारं हृदि नन्दामः । १

कान्तिर्वपुषो घनजलदाभा
स्मितरेखा तव चंचद्विद्युत्
कण्ठे वैदूर्यरचितहाराः
कौस्तुभमणिनोरो रोचिष्मत् । २

सौन्दर्यं सागरसंकाशं
नवनवं पश्यतां प्रतिभाति
तव नित्यनवाभिर्लीलाभिः
इह भक्तजनो मुदमुपयाति । ३

महिमा माधव ! पारे वाचां
त्वं त्वन्मनीषितं जानीषे
शास्त्राणि मौनमालम्बन्ते
वेदासौ यं त्वं वेदयसे । ४

स्रष्टा त्वं नवलक्रान्तीनाम्
अपहर्ता सकलभ्रान्तीनां
उपदेष्टा मानसशान्तीनां
त्वमुदयशैलो नवकान्तीनाम् । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मग्लानिः पापोपचयः
जनतापकरो भवतीह यदा
अवतीर्य भुवं परिपासि विभो ।
सुखयसि लोकं ज्योत्स्नेव विधोः । ६

पार्थं निमित्तमात्रं कृत्वा
दत्तं यद् गीतामृतसारम्
आप्यायितमेतत् सर्वजगत्
तत् कर्म कृतं बहुसमुदारम् । ७

कर्मण्यधिकारो हे भगवन्
गीताशास्त्रे कथितो भवता
त्याज्यश्च कर्मणः फलकामः
लोके नरेण किल बुद्धिमता । ८

कर्माखिलमपि बन्धनहेतुः
तद्भवतु पुण्यमथवा पापम्
आसक्तिविहीनं कर्म कृतं
तारयितुमलं संहृततापम् । ९

स्वजनोऽपि च योऽनयपथगामी
नूनं स नृशंसोऽर्हति दण्डं
शिशुपालो मातुलकंसोऽसौ
वधदण्डमाप्नुतामतिचण्डम् । १०

सत्यपि सकले सामर्थ्ये त्वं
जनसहयोगं संप्रार्थितवान्
सौहार्दैर्मिथः परं श्रेयः
चिनुतेति त्वं प्रतिपादितवान् । ११

मा भूद् व्यर्थं बहुजननाशः
इति हेतोः सदुपायो विहितः
घोरे द्वन्द्वे युद्धे नयतो
भीमेन जरासन्धो निहतः । १२

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काराक्षिप्ता बहवो भूपा
मुक्ता अभवन् किल दुष्टवधात्
अलभन्त मुदं प्राणत्राणात्
अवहंश्च कृतज्ञत्वं विनयात् । १३

भीषणसमराब्धेरुत्तीर्णाः
तव नीतिपोतमध्यारूढाः
पाण्डोस्तनयास्त्वां शरणमिता
यत्रापि यदा वा दिङ्मूढाः । १४

उत्सस्त्वं सकलज्ञानानां
भ्रान्त्वा भ्रान्त्वा त्वामायान्ति
शरणागतिरेव परं तत्त्वं
तां श्रिता नरा भुवने भान्ति । १५

गोपीनां शुद्धं प्रेम परं
भक्तेरादश प्रस्तौति
यद्वा यद्रूपं येन पथा
यो भजते त्वामेव स्तौति । १६

शक्तिः का मम तव गुणकथने
त्वमचिन्त्यो वाङ्मनसोर्हि परः
वक्रे हृदि मे वंशीं ध्वनयन्
समुदं वस सदा त्रिभङ्गधरः । १७

हे विश्वरूप हे योगेश्वर !
वंश्या मधुमय्या शोभितकर !
गीतामृतपानाप्यायितनर !
सुन्दर नटवर ! मामप्युद्धर । १८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५. वीणावादिनि ! वन्दे

भगवति वीणावादिनि ! वन्दे

१ शारदाभ्रनिर्मलपरिधाने !
हंसासीने वीणापाणे !
देवदनुजनरवन्दितचरणे !
जय वरदायिनि विजयवितरणे !
अनिशं तव वरिवस्याप्रवणा
भक्तास्ते विलसन्त्यानन्दे !

२ त्वं विद्यानां सकलकलानां
परितो व्याततविमलविताना
कति न जना भूमौ राजन्ते
समुपार्जितविज्ञाननिधाना
लसतु मनोमधुपोऽपि मदीयः
रममाणः पदपद्ममरन्दे

१ स्तवनाञ्जलिः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३ मुक्तिं यच्छसि दिशसि च मुक्तिं
कथयसि विपदुन्मज्जनयुक्तिं
ज्ञाननिधिस्तव जलधिगभीरः
कस्तं तर्तुं शक्तो धीरः
तव सम्पत्कणविचयशालिनः
किं न रमन्ते भुवनालिन्दे

४ यच्च विलोक्यं भुवि कमनीयम्
अगणितसुखसुविधारमणीयं
तत्र महिम्नां ते विस्तारः
लभ्यो जातु न पारोऽवारः
चकितखगोऽब्धावैति च पोते
एमि पदाब्जे तव सुखकन्दे

५ वितर वितर मयि देवि कृपामयि !
तव पदाब्जरतिमविचलभावां
तत्प्रसरत्सौरभ - परिपूर्णं
प्राङ्गणमखिलं विलसतु जगतां
तन्मयतामुपयातु समस्तं
वीणायास्ते क्वणितेऽमन्दे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६. वयं वन्दामहे

समे सम्भूय जगदीशं
बिभुं शरणं समायामः
वयं वन्दामहे

१ महान् यः सृष्टिकर्ताऽस्ति
महान् यो भूतभर्ताऽस्ति
यदीयो राजते महिमा
यदीयो भ्राजते गरिमा
वयं तं कीर्तयिष्यामः
कथं तं विस्मरिष्यामः।
वयं वन्दामहे।

२ न मे चित्तेऽभिलाषोऽस्ति
भवेत् प्राज्यं ममैश्वर्यम्
मदीया कामना नास्ति
सुखं स्याद् राजसंधार्यम्
वयो लोकस्य सेवायां
प्रयायादेष मे कामः।
वयं वन्दामहे।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३ वयं गहने तमोजाले
दयालो हे परापतिताः
न लक्ष्यं लक्ष्यते किंचित्
क्व यामो बत समाकुलिताः
प्रभासय भास्वरं ज्योतिः
सुमार्गं येन विन्दामः ।
वयं वन्दामहे ।

४ प्रपतिता दुःखदावाग्नौ
विषमताव्रततिपरिवीताः
प्रकामं दुर्गता आर्ता
महाव्यामोहसंभीता
ऋते करुणेशकरुणायाः
क्वचित्त्राणं न विन्दामः ।
वयं वन्दामहे ।

५ भवाटव्यां बहु भ्रान्तं
लवः सौख्यस्य नो प्राप्तः
भ्रमः क्लान्तिर्विषादो वा
जगत्यां कुत्र नो व्याप्तः
परं सर्वं विदित्वेदं
न संसाराद् विरज्यामः ।
वयं वन्दामहे ।

६ लक्ष्यतो मामपासयितुं
सत्पथान्माऽपसारयितुं
समुदयो योऽस्ति विघ्नानां
प्रहारो लोभमोहानां
प्रभोऽपाकुरु समस्तं तत्
शरण्यं त्वां समायामः ।
वयं वन्दामहे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७ इयं मायानटी सर्वान्
नरानसुरांश्च देवादीन्
विविधमोहेषु पातयते
प्रदत्ते संकटान्याधीन्
स्वमायापाशतो रक्षेः
कृपालो ! एतदिच्छामः ।
वयं वन्दामहे ।

८ जलीयानां स्थलीयानां
नभोऽतलपर्वतीयानां
सुरासुरमानवीयानां
विभूतीनां त्वदीयानाम्
इयत्तां को विनिश्चिनुयाद्
अतस्त्वामेव संयामः ।
वयं वन्दामहे ।

९ राजतां मे प्रियो देशः
निवेशः सम्पदामेषः
दयादृष्टिस्त्वदीया स्यात्
निराशायास्तमोऽपेयात्
वयं पारं महिम्नस्ते
कथं यामः कथं यामः ।
वयं वन्दामहे

१० दीयतां नः शुभा बुद्धिः
स्याम सुपथे वयं निरताः
सदसतोर्वेदने प्रभवः
पथो नीचाच्च निवृत्ताः
निरस्ताऽखिलमनस्तापा
धृतिं शान्तिं च विन्दामः ।
वयं वन्दामहे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७. तमसो मा ज्योतिर्गमय

हे ज्योतिर्मय पुरुष परात्पर !
हे शरण्य सर्वेश गुणाकर !
त्वं भुवनानां निर्माताऽसि
ध्रुवचेतनजगतां धाताऽसि

करुणा तेऽविरलं प्रवहन्ती
प्राणिषु कृपां भाति वितरन्ती
यद् विरचयसे तद् व्याप्नोषि
व्यूहं लीलामय ! वितनोषि

कुत्र न ते ज्योतींषि विभान्ति
के नो तैः सौन्दर्यं यान्ति ।
प्रभारिङ्गणैस्ते ज्योतिर्मय !
आदीप्ते भुवनेऽपि दयामय !

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथं तमोऽस्मान् वद विधुरयते

जीवजगद् व्यथयाऽऽपूरयते

मनुजास्ते मनुजांश्छलयन्ति

लोभवशाः परहितमाघ्नन्ति

हिंसाकलुषितवातावरणे

सन्देहाकुलसकलाचरणे

हे करुणामय ! कथं वसामः ?

भयभीताः कां दिशं व्रजामः ?

धर्मजातिवाचां छलवेषैः

प्रान्तदेशरक्षाव्यपदेशैः

युद्धदानवः खेलां कुरुते

सन्नीतेरवहेलां कुरुते

परस्परं विश्वासो नास्ति

सद्वृत्तेरावासो नास्ति

अर्थदृशा सर्वं पश्यामः

स्वार्थं सर्वेशं कलयामः

कुत्र न दम्भाडम्बरनीडं

लोभज्वालैर्जगदवलीढम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

घोरतमसि पतिताः सीदामः

सर्वशरण ! कं शरणं यामः

आलम्बनहीनान् नस्तारय

कृपया कृपादृशं विस्तारय

ज्योतिस्ते हृदये समुदेतु

गाढनिलीनतमो लयमेतु ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयो रागः

बालवाटिका

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

८. इयं वाटिका मे

इयं वाटिका मे
इयं वाटिका मे
१ इयं भूरिरम्या
इयं सर्वकाम्या
परं मे प्रियाऽस्ति
फलैर्भूषिताऽस्ति
श्रिया सेवितेयं
जनैर्वन्दितेयम् ।
२ प्रियोऽयं रसालः
इयं षट्पदाली
प्रकूजत्यजस्रं
विचित्रा खगाली
जनान् सम्मदयति
मनश्चंचलयति ।
३ गणोऽयं तरूणां
जलैः सेचितो ऽस्ति
समूहः क्षुपाणां
जलैः पूरितोऽस्ति
खगाः संपतन्ति
जलान्यापिबन्ति ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ स्वमित्रैर्युतोऽहं
भ्रमाम्यत्र नित्यम्
प्रधावामि कूर्दामि
खेलामि नित्यम्
प्रियाण्यालपामि
प्रमोदं भजामि ।

५ वयं संचरामः
खनित्रं धरामः
विरच्य प्रणालीं
जलं प्रापयामः
सुयत्नैस्तु नः
वाटिका भूषितेयम् ।

६ द्रुमान् रोपयामः
भवेद् वातशुद्धिः
फलानामवाप्तिश्च
शोभाभिवृद्धिः
तरूणां सुरक्षां तु
पुण्यं वदामः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

९. वयं विद्यालयं यामः

वयं विद्यालयं यामः
वयं विद्यालयं यामः

१ नवां शिक्षां समादातुं
नवान् प्रश्नान् समाधातुम्
अविद्यां मूलतश्छेत्तुं
दलितवर्गं समुन्नेतुं
बलीयान् विद्यते कामः
वयं विद्यालयं यामः

२ पदं गुरुगौरवोन्नीतं
श्रिया कान्त्या च संवीतं
पुनर्लभतां प्रियो देशः
कृपां तन्यात् स विश्वेशः
प्रयत्नेभ्यो न विरमामः
वयं विद्यालयं यामः

३ समाजे भिन्नता याऽस्ति
मनःसु खिन्नता याऽस्ति
प्ररूढा अन्धविश्वासा
जनेभ्यो दत्तसन्त्रासा
निराकर्तुं समीहा नः
वयं विद्यालयं यामः

४ सत्पथालम्बनं श्रेयः
प्रमादः सर्वथा हेयः
जीवनं सार्थकं नः स्यात्
सुलभ्यं किं किमुद्योगात्
इहैवागत्य बोधामः
वयं विद्यालयं यामः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१०. भारतीय-मनीषा

वद केशव ।
किमिदं क्रीड़नकम् ?
नहि नहि नहि
एतत् संगणकम् । १

श्यामे ! त्वं वद
किं विदधाति ?
प्रश्नानाम्
उत्तरं ददाति । २

अंगुलिमिह
गुटके न्यस्यामि
क्रमशोऽहं
प्रश्नान् पृच्छामि । ३

कोऽसौ कोऽसौ ?
येन विरचिता
अष्टाध्यायी
सूत्रैः ग्रथिता । ४

वाचयते लिखितं
हरिशरणः
मुनिः पाणिनिः
वैयाकरणः । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भैषज्ये कौ
लोकविश्रुतौ
मुनिमान्यौ तौ
चरक - सुश्रुतौ। ६

नाट्ये शिल्पे
काऽद्भुतरचना ?
भरतनाट्य-
शास्त्रं तत्प्रथना। ७

किं नामैतद्
उपग्रहयानम् ?
आर्यभटम्
विश्वेऽर्जितमानम्। ८

आर्यभटः कः ?
ज्योतिर्विज्ञः
ग्रहगतिकथनपटुः
गणितज्ञः। ९

गणिते या
रचना विख्याता
लीलावत्याः
को निर्माता ? १०

आचार्योऽसौ
भास्करनामा
तस्यैषा
रचना अभिरामा। ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपादयते
यश्चैतन्यं
पादपमध्ये
तस्य नाम किम् । १२

विस्मितमकरोद्
योऽखिलविश्वं
वसुरिति विदितो
जगदीशोऽयम् । १३

अभिनन्द्यं
प्राच्यं विज्ञानं
रक्ष्यमिदं
वहुमूल्यनिधानम् । १४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

११. मूषक धाव

मार्जारः

मूषक ! धाव मूषक ! धाव
त्वामेषोऽहं गृह्णामि
क्षुधा बाधते मां तीव्रा
त्वामत्तुम् अभिवांछामि । १

मूषकः—

सत्यमिदं कथितं भवता
अस्माद्धेतोः धावामि
वृक्षतलेऽहं बिलमध्ये
विश्रमितुं क्षणमिच्छामि । २

मार्जारः—

मा विश मा विश बिलमध्ये
परिहासादेतत् कथितम्
मिथः प्रेमपूर्वं लोके
सर्वैः जीवैः वस्तव्यम् । ३

मूषकः—

अद्य त्वं क्षुधितो भासि
क्षुधितानां का मर्यादा ?
विवरगतो हि विधास्येऽहम्
अत्र चिन्तनं यदा कदा । ४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२. सन्मतिर्दीयताम्

हे प्रभो ! सन्मतिर्मे सदा दीयताम्
सज्जनानां सरण्यां मनो नीयताम्

१ अस्तु लक्ष्यं मदीयं हि विद्यार्जनं
यच्च भूमौ नराणां निधानं परं
शिक्षया सत्यया जीवनं राजताम्

२ नाहमापत्सु जह्यां क्वचिद् धीरतां
दर्शयेयं न दैन्यं पुरः श्रीमतां
मानसे जेतृभावः सदा वर्तताम्

३ राष्ट्रसेवां प्रकुर्यामहं निष्ठया
लोभमोहौ तरेयं धिया धीरया
लोकहितकर्मणे प्रेरणा दीयताम्

४ विस्मरेयं विभो ! त्वां न सौख्ये क्वचित्
नापि परमेश हे ! संकटे कर्हिचित्
तावकं भक्तिपीयूषमापीयताम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१३. स्वदेश-गीतिः

मधुमयभारतदेशोऽस्माकम्
अस्य वयं निर्मातारः

प्रसरतु दिशि दिशि विमलं ज्योतिः
क्वापि न पुष्यतु तिमिरसंहतिः
उच्चैः गौरवपदमधिगन्तुं
वयं योजनाकर्तारः। १

निष्क्रियता देशादपयातु
जने जने श्रमगरिमा भातु
लुप्तप्रायगृहोद्योगानां
सर्वे वयमुद्धर्तारः। २

धनधान्यैः भरिता वसुधा स्यात्
विद्युच्छटया दीप्तदिशा स्यात्
उच्छलदम्बुभरितलघुसरितां
वयमाग्रामं नेतारः। ३

धीरवीरविदुषां मानोऽस्तु
देशात् त्वरितं दम्भलयोऽस्तु
भारतभुवि नैतिकमूल्यानां
वयं स्वयं स्थापयितारः। ४

कामं परमिष्टा नः शान्तिः
प्राप्ते समये क्रियते क्रान्तिः
रणभूमौ स्मः पृथासूनवः
अरिदलदर्पनिहन्तारः। ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१४ चल तं देशम्

चल रे बन्धो ! चल तं देशम्

१ यत्रालोकच्छटा विभान्ति
यत्र तमांसि न पोषं यान्ति
जाग्रति लोकाः पुरुषार्थेषु
दधति च निष्ठां नीतिपथेषु
भक्त्या यत्र भजन्त्यखिलेशम् ।

२ स्पर्धा चारित्रे वर्वर्त्ति
दया दीनमनुजे जागर्ति
जनकल्याणभावनामरितं
शुभसङ्कल्पं मनो विचरति
धरति च मङ्गलमयपरिवेषम् ।

३ जागरूकता कर्तव्येऽस्ति
ऐक्यभावना जने जनेऽस्ति
वेदपथः प्रेयान् मनुजानां
यत्र वधार्थे दुष्टदलानां
पार्थो धारयते रणवेषम् ।

४ यत्र सुजनता लभते मानं
विन्दति मानवता गरिमाणं
नैतिकमूल्यानां सत्कारः
जनो न दम्भार्चनसमुदारः
नय तं देशं वरसन्देशम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ मोहालस्यपराङ्मुखताऽस्ति
मैत्री मुदिता यत्र चकास्ति
राष्ट्रगौरवं हृत्सु वहन्ति
प्राणानपि तत्कृते त्यजन्ति
चल भोस्तत्र सभक्तिविशेषम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१५. श्रम-गौरवम्

किं किं नो भविता श्रमार्चनात्
किं किं नो भविता

१ प्रचलन्तः सिद्धिं गच्छन्ति
प्रचलन्तो विजयं विन्दन्ति
प्राप्तव्यं तानेति यथा किल
रजनीमनु सविता ।

२ दैवालम्बनतः किं लभ्यं
किमपि न मह्यं किमपि न तुभ्यं
यतमानानामाशालतिका
नूनं स्यात् फलिता ।

३ दुर्गमदेशानपि परियाति
यथा तथा प्राप्यं संयाति
दैवं नाश्रयते कर्मठता
अविरतकर्मरता ।

४ योऽपि जगति विज्ञानविकासः
भवति न सहसा तद्विश्वासः
मनुजानामविरतमुद्योगैः
जगती गौरविता ।

५ यत्नो विहितो वारं वारम्
उद्घाटयते सिद्धिद्वारं
जीवनपथे नवानुभवानाम्
एकोद्भावयिता ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयो रागः

प्रबोधनम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१६. श्रेयोवर्त्म परम्

पठ पठ पठ रे मानव ! पठ रे
पठनं सौख्यकरम्
जगत्यास्तिमिरनिकायहरम् ।

१ पठनं सुविचारं प्रेरयते
पठनं सन्मार्गं दर्शयते
पठ मनीषिणां वरसाहित्यं
सरसमधुरललितम् ।

२ पठ समयं व्यर्थं मा यापय
ये निरक्षरास्तानध्यापय
कुरु जनमंगलकार्यं बन्धो !
एतन्मोदभरम् ।

३ भाति न कमलं श्रिया विहीनं
मानवकुलमपि विद्याहीनं
विद्यार्थं तप तपो मनुज रे
परिणामे शुभदम् ।

४ काव्यं पठ किं वा इतिहासं
पठ पठ मानवजातिविकासं
मंजुलकथावितानं पठ रे
सद्यः क्लान्तिहरम् ।

५ हितमहितं स्वं ते जानन्ति
नित्यं स्वाध्ययनं कुर्वन्ति
उन्नति - कामानामेतद्वै
श्रेयोवर्त्म परम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१७. जागरण-गीतम्

भूयान् समयो हे कविबन्धो !
गातुं मधुमयगीतं
वर्तमानमवचिन्तय तावत्
स्मर मा स्वर्णमतीतम्

१

परदेशीया संस्कृतिरमणी
कुरुते यत्र विहारं
सम्पूर्णं निजरिक्थं मनुते
यत्र जनो निःसारं
निजभाषा निजजातिगौरवं
जनयति कष्टमपारम्
एवं मनोरुजार्तजनानां
कः कुर्यादुद्धारम्
मोहभवां तन्द्रां ध्वंसयितुं
धम रे शंखं स्फीतम्

२

चषकभरं सम्मोहनमदिरां
नित्यं यत्र पिबन्ति
नैतिकमूल्यानामुपहासं
यत्र नराः कुर्वन्ति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वार्थमञ्जुलोत्सङ्गलालिता
भ्रष्टं किं न चरन्ति
दीनहीनमानवताकाये
बलदृप्ताः प्रहरन्ति
क्रान्तदर्शि तव रूपमुदञ्चय
नवल - जागरणगीतम् ।

३

स्वेच्छाचारित्वप्रभञ्जनो
वाति समुद्धतवेगम्
आकुलयन् सकलां स्थितिमुच्चैः
जनयति सुजनोद्वेगम्
उदयतु चन्द्रस्तारावलिरपि
दीव्यतु कामं सविता
आसीने प्रतिशाखमुलूके
उपवनस्य किं भविता ?
सुकवे ! त्वं परिभूश्च मनीषी
पाहि जनं भयभीतम् ।

४

आतङ्को नित्यं नवखेलाम्
अङ्गणवेद्यां तनुते
क्रौर्यतूलिकाकरोऽहर्निशं
दिशः शोणिताः कुरुते
राजनीतिरबलेव लोकते
मानवताया घातं
नवलवधूरिव विनयविनम्रा
तन्वाना प्रणिपातम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्य लेखनीं कुरु करवालं
जहि यद् दुरितपरीतम् ।
५
धरा धीरभावाद् विकम्पते
व्योम भयाभिक्रान्तं
हिंसाकलुषितवातावरणे
मनो दूयते तान्तं
युद्धवारिदान् प्रेयं मदोद्धत—
दनुजकुलानि हसन्ति
शरणं मान्यद् धैर्यविहायं
लोका इह पश्यन्ति
जने जने शक्तिं सञ्चारय
अनुकूलय विपरीतम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८. प्रबोधवाणी

परसेवाव्रतमिह नाचरितं
मन्ये जन्म वृथा नीतं
निर्बलजनरक्षा नो विहिता
किं तीर्थे पुण्यं विचितम् । १

उषितं प्रेम्णा यस्या अङ्के
यत्सुरभितपवने श्वसितं
द्वेक्षि त्वं तां मातृभुवं हा
धिग् विभवं जगति स्फीतम् । २

उप्तं रागद्वेषणबीजं
मोहरसाढ्यं फलमाप्तं
क्रन्दसि किं भोः शान्तिसुखैषी
विन्दसि नो समयं यातम् । ३

दैवीसम्पदि तव नो यत्नः
मनो दोषविचयेऽभिरतं
पुनरपि निर्मलकीर्तिकामना
किं व्यर्थं न वयो नीतम् । ४

रवि-शशि-तारामण्डलमखिलं
धरा-जलधि-विपिनाद्रिकुलं
येन व्याप्तं ध्यातो नासौ
किमधीतं शास्त्रं सकलम् । ५

मा मृगयेस्त्वं शशकविषाणं
भौतिकवस्तुनि नैव सुखम्
आराधय जगतां प्रभुमेकम्
आचर जनहितकर्म शुभम् । ६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१९. स्वदेश-भक्तिः

वैभवैस्तेऽपि किं किं कलाकौशलैः ?
देशरागेण चेतो न चेद् रञ्जितम्

(१)

आपगा भारतीयां भुवं सर्वदा
कुर्वते क्षालितामामृतैः वारिभिः
निर्झरिण्यः पतन्त्यो दिशः कुर्वते
नादसम्पूरिताः स्वीयसङ्गीतकैः
विष्टपेऽनारतं शान्तिसन्देशनं
दीयते प्रोद्यतैः प्रोन्नतैः पर्वतैः
सर्वमेतन्न ते रोचते मुग्ध रे
किं प्रकुर्याद् विलासे मनः सञ्जितम् ।

(२)

भारतं भिन्नतां भाति संधारयत्
भिन्नतास्वेकसूत्रात्मतामादधत्
संस्कृतीनामिदं केन्द्रमास्ते बृहत्
सर्वविश्वाय पीयूषधारां वहत्
वेदमन्त्रैः प्रतिध्वानवत्यो दिशः
आत्मतत्त्वस्य चिन्तारताः मानवाः
मुग्धवत् सर्वमेतत् किमावीक्षसे
अत्र शीर्षं जगत्याश्चिरादानतम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३)

नागरीसभ्यतातो विदूरे परम्
अध्यरण्यं वसन्ती प्रजा भारती
या क्वचिज्ज्ञानकिरणैः न संवीक्षिता
दुःखदारिद्र्यनैराश्यकुण्ठावती
सा तु वन्येति कृत्वा त्वया त्यज्यते
हेलया हन्त तस्यां त्वया हस्यते
यद् विदेशे भवं रम्यमेवाखिलं
धिक् त्वदीयं मनो दास्यसम्पीडितम् ।

(४)

यान्त्रिकोत्कर्षगर्वेण संराजसे
सम्पदां चाकचिक्येन संभ्राजसे
व्योमयानेन विश्वं त्वयाऽवेक्षितम्
अद्भुतं यत्र तत्रापि संप्रेक्षितम्
शिक्षयाऽस्युन्मदो दर्पसन्दीप्तया
मानवानां हिताराधिका नैव या
किं प्रकुर्मस्त्वदन्वेषणैर्मूढ रे
ध्वंसशस्त्रैर्हि यद् विश्वमाकम्पितम् ।

(५)

अन्नतोयैर्यदीयैः वपुः पोषितं
प्राणितं यत्र संखेलितं लासितं
द्वेक्षि तां त्वं धरां मातरं जाल्म रे
आनतं यत्र भक्त्या जगन्मस्तकम्
त्यागभावान्वितं धर्मरागान्वितं
ज्योतिराभासते मानसे ते कथं
भोगवादस्य दीप्तच्छटार्चितं
जीवनं तावकं यावदारञ्जितम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२०. मौनखेदं मा भजेथाः

लेखनि ! त्वमनन्तविभवे !
मौनखेदं मा भजेथाः

(१)

सत्यरक्षायै मुदा ये
राज्यपुत्रादिं त्यजन्ति
मातृतोषार्थं स्मितास्या
ये गहनविपिनेष्वटन्ति
जन्मभूप्रेम्णा कनक—
लङ्कां न मनसाऽपि व्रजन्ति
ते हरिश्चन्द्राश्च रामाः
क्वाद्य भूमौ सम्मिलन्ति ।
तत्प्रतीक्षायां मुधा मुग्धे !
न समयं सन्नयेथाः

(२)

अमितविस्तारा धरित्री
अमितमेतस्याश्चरित्रं
मनुजदनुजानां सतत—
संघर्षगाथाभिर्विचित्रं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नित्यपरिवर्तनरुचिः
कालो महामहिमाऽनुभावः
प्रेक्ष्यतामनुभूयतामथ
चर्च्यतामस्य प्रभावः
किं न भोस्त्वमिदं जगत्या—
श्चित्रफलके चित्रयेथाः ।

(३)

अद्य नरपतयो न कामं
सन्ति भूयांसः कुबेराः
शक्तिवैभवदुर्मदा ये
सच्चरित्रैर्जातवैरा
ये सदा मदिरेक्षणाना—
मीक्षणीयमदं पिबन्ति
ये प्रजातन्त्रेऽधिकारिभ्यो
हि नीतीर्निर्दिशन्ति
तच्चरितगानं प्रकुर्या
यदि च तद्गाने क्षमेथाः ।

(४)

ये युवानो गर्वमुच्चैः
पर्वतानां ध्वंसयन्ति
उत्तरंगसरित्प्रवाहान्
निजभुजाभ्यां संतरन्ति
वैरिकुलवक्षांसि नित्यं
हेलया प्रविदारयन्ति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वारणानपि दुर्मदान् ये
साहसैः किल वारयन्ति
तत्स्तवैरात्मानमुच्चैः
धन्यतां सुभगे ! नयेथाः ।

(५)

बन्धनं वैवाहिकं हा
पण्यतां लोके प्रयातम्
अद्य तद् वैरस्यजननं
भयविमिश्रं प्रेमघातं
लोभिनो मनुजा मनुजता—
मस्तकं पद्भिः क्षिपन्ति
अद्य निर्दोषा युवतयो
दीप्तवह्नौ संविशन्ति
कुप्रथानां नाशनार्थे
साहसं किं नो श्रयेथाः ।

(६)

अन्धविश्वासं श्रितेभ्यः
सत्पथं ये दर्शयन्ते
आर्त्तजनरक्षाविधौ
सर्वस्वमपि ये ह्यर्पयन्ते
म्लानवदनेषु स्मितैः
कुसुमं विकासयितुं यतन्ते
छायया परितोष्य लोकान्
आतपं स्वयमासहन्ते
किं न तेषां पूतचारित्रं
जगत्युद्भावयेथाः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(७)

येऽपरिग्रहमुपदिशन्तः
सन्त्यधीशा वैभवानां
हर्म्यसौख्यं धारयन्तो
येऽग्रगण्या गर्वितानाम्
इन्द्रियार्थेभ्यो मनो
येषां कषायं नैव जातं
अर्चनीयतमा जगत्यां
ते कषायाम्बरधराणाम्
अङ्कयेस्तेषाँ चरित्रं
मा स्म भीतिं संश्रयेथाः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२१. उद्बोधनम्

रविरश्मिरञ्जितेऽखिललोके
छिन्नं सकलं नैशं ध्वान्तं
दिग्भागा विहगारवमुखरा
जातं निरभ्रगगनं कान्तम्। १

जनतां प्रतिबोधमितां सकलां
पश्यामो विश्वे विश्वस्मिन्
निद्रासि त्वं भारतभूम्यां
स्वप्नानां लोके कतमस्मिन्? २

स्मरणं कुरुषे किं वीराणाम्
अरिदलतुषराशिसमीराणां
तपसे धृतवल्कलचीराणां
शान्त्यै श्रिततटिनीतीराणाम्। ३

किं रोमहर्षणं संग्रामं
ध्यायसि कुरुपाण्डवसैन्यानां
शस्त्रास्त्राणां प्रतिसंघट्टं
क्रोधान्धानां धुतदैन्यानाम्। ४

पार्थस्य शरासनमुक्तानां
बाणानां लक्ष्यं लक्षयसे
उत भीमसुयोधनमध्यगदा—
युद्धं भावेन निभालयसे। ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

किं वाऽतीते त्वं स्वर्णमये
स्वीये प्रकुर्वंती दृक्पातं
योगिनी निश्चलासनबन्धा
याता वेद्यान्तरशून्यत्वम् । ६

नन्दानामुन्मूलयितारं
चन्द्रं गर्वेण विलोकयसे
चाणक्यं नयविन्मूर्धन्यं
नतशिरोधरा ह्यभिवादयसे । ७

येषां पावनकीर्त्या लसिता
वसुधा मुदिता धत्ते गर्वं
पुंसस्तान् भारतभूमिभुवो
मनसा प्रणमन्ती धन्या त्वम् । ८

सुभगे ! निजयत्नैरविरामैः
पूर्वं विश्वे गुरुतागरिमा
लब्धोऽध्यात्मे विद्याविभवे
नूनं तवैष महितो महिमा । ९

भौतिकसौख्यात् खेदं प्राप्तो
मनुजो देशं स्वीयं हित्वा
पातुं मधुरां किल शान्तिसुधाम्
अत्रैति मनसि मोदं धृत्वा । १०

क्व गतं तत् तावकवर्चस्वं
रिपुमानविभञ्जकमौर्जित्यं
क्व गतो जनसौख्यहिते त्यागः
राष्ट्रं प्रत्यप्रतिमो रागः । ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेषे विलासशय्यां लग्ना
श्रान्तेव विहितगुरुतरकर्मा
किं कथयामस्तव मुग्धायाः
लभसे सौख्यं घननिद्रायाः । १२

जाता या दशा तवाद्यतनी
गगनं क्रन्दति रोदित्यवनी
याऽऽसीर्विश्वे सुविदितमहिमा
जनशोचनीयतां यास्यधुना । १३

गणनातीताः किल जातिभिदा
भेदप्राकारान् रचयन्त्यः
किं वैमनस्यमुपहारं नो
ददते शक्तिं तव जरयन्त्यः ? १४

बहवो धर्मा अथ मतवादा
पूजापद्धतयो भूयस्यः
नैके धर्मग्रन्था अपि ते
अगणितदेवानां वरिवस्या । १५

मन्त्रात्मकशास्त्राणां महिमा
तान्त्रिकसिद्धान्तानां गरिमा
अध्यात्मचिन्तने विस्तारः
साधनमार्गाणां कः पारः । १६

मन्ये सर्वं कमनीयमिदं
गरिमोपेतं स्पृहणीयमिदं
जनगणमंगलमखिलं सूते
व्यापकचिन्तनदृष्टिं ब्रूते । १७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रान्ति परन्तु जनयित्वेदं
भेदं कलहं वा कारयते
बहुसम्प्रदायसृष्टिं कृत्वा
ऐक्यं मनसो निस्सारयते। १८

कश्मलतां स्थिरजलमिव याता
पर्युषिता तव चिन्तनधारा
रूढित्वे के प्रहसन्ति न रे
किं किं नो त्वयि जल्पन्ति परे। १९

परकीयैश्छलबलतो नीताः
स्वजनं समुदीक्षन्ते सीताः
रामा विषण्णवदना दीनाः
संकोचपरा हा पटलीनाः। २०

हृष्टा धर्माणां पदे पदे
सर्वे मुक्त्या विक्रेतारः
राजोचितभोगान् भुञ्जाना
मठिनस्तव हृदयविजेतारः। २१

बाह्याचारं धर्मं मनुषे
सर्वारम्भे दम्भं तनुषे
तीर्थेषु धनत्यागः क्रियते
स्वजनो हा विनाऽगदं म्रियते। २२

दीनानां श्रममोषं कुरुषे
स्वार्थस्य सदा पोषं कुरुषे
कलहैररिपरितोषं कुरुषे
आपदि वद किं रोषं कुरुषे? २३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्यं दाम्पत्यं वरवध्वोः
तव लोभवशाज्जातं पण्यं
परिभव-कुण्ठा-नैराश्यगता
नवपरिणीताः प्रविशन्त्यनलम् । २४

सफलाऽद्य हन्त सा दुर्नीतिः
या मैकाले - मनसः सृष्टिः
चिन्तनशैली तव वैदेश्या
भारतजा त्वं रूपाकृत्या । २५

संस्कृतिरमणी परदेशीया
गेहे तवैव वासं कुरुते
रिक्थं सर्वं ते निःसारम्
उद्घोष्य हेलयाऽपाकुरुते । २६

परपरिधाने धत्से गर्वं
परवाचि निधत्से स्नेहभरं
स्वाधीनो नापि विचारपथः
श्रद्धेयं ते परकीयवचः । २७

तव राजनैतिकी चेतनता
चिरतस्तिमिराकुलतां याता
नेतृस्तवने स्वोदरभरणे
तावकशक्तिर्विलयं याता । २८

काञ्चनहरिणेन विलोभ्य जनं
दीनं निरुपायं मुग्धतरं
धर्मान्तरणे पटवोऽतितरां
केचित् कुर्वन्ति धरां विधुराम् । २९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पशुमारं त्वं कुटिलैररिभिः
बहुधा प्रमार्यसे न्यक्क्रियसे
मुञ्चसि नो मोहमयीं निद्रां
तव जागरस्य को वेद विधाम् ? ३०

अन्येऽपि कपटवेषा बहवः
प्रतिवेशे निवसन्तो रिपवः
मुग्धे ! कच्चित् तान् परिचिनुषे ?
किं वा तत्प्रतिकारं कुरुषे ? । ३१

एवं विधर्मिणां समुदायैः
सनिकारवंचनं पदे पदे
प्राप्याऽपि जागरं नोपैषि
केयं हा घना प्रमीला ते ? ३२

आत्मीयैरप्यथ परकीयैः
वारं वारं परिमुषिताऽसि
घोरां विपदं सहमाना नो
सुखवातसेव्यतां याताऽसि । ३३

चक्रं श्रीकृष्णकराम्भोजे
चापो रघुनन्दनकरकमले
विविधास्त्रधारिणी श्रीदुर्गा
मारुतिहस्ते प्रविभाति गदा । ३४

तेभ्यः समर्प्य शस्त्रास्त्रवलं
हे जनते ! त्वं निश्चिन्ताऽसि
क्षान्तेर्वा मिथ्याकारुण्याद्
अन्यत् किं वद सविधे तेऽस्ति ? ३५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यपि विद्याविभवे विपुले
परविद्रावणशक्तौ सत्याम्
ऐक्याभावात् त्वं पृथक् पृथक्
युद्धेऽसीदो भारतभूम्याम् । ३६

मिथ्यासौख्यैश्चेदपह्रियसे
आपत्तिशतैः सततं व्रियसे
बहुवारं भीरुतया म्रियसे
एवं किं वद धरणौ ध्रियसे ? ३७

सर्वं विचिन्तयेर्बहुवारं
स्वयमेव कुरुष्वात्मोद्धारं
संचिनु शक्तिं श्रय सन्नीतिम्
ऐक्यं धारय वारय भीतिम् । ३८

पुनरपि गौरवमहितां गुप्ताम्
आसाद्य जगति सुतरां विकसेः
तिमिरान्वितशर्वर्याः पारे
प्राभातिकसुषमावद् विलसेः । ३९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२२. उद्बोध-गानम्

क्षणं दीयतां भ्रातरोऽत्रावधानं
विधाय द्रुतं मोहनिद्रावसानम्

१ इयं धर्मतपसां पवित्रा धरित्री
भवे विश्रुता मङ्गलानां सवित्री
कथं कश्मलैर्हा समन्ताद् वृतेयं
कुरीतिग्रहैः सर्वतो धर्षितेयं
समे रक्षतास्याः कलं कीर्तिमानम् ।

२ इमे नैकधर्मा इमे सम्प्रदाया
इमे जातिमध्ये मिथः सम्पराया
विभक्तं विभेदैः पराक्रान्तगात्रं
प्रजातं हहा भारतं हास्यपात्रम्
इमं भेदयत भेदभित्तेः प्रतानम् ।

३ न भिन्ना जगत्यां क्वचिद् भक्तिमन्तः
न भिन्ना जगत्यां क्वचिच्छक्तिमन्तः
न भिन्ना विपत्ति समुत्सारयन्ति
न भिन्ना रिपूणामुरो दारयन्ति
भवत शक्तिमन्तो विधत्तैक्यमानम् ।

४ खलाः सक्रियाः सन्ति सर्वत्र देशे
अटन्त्यत्र हा तस्कराः साधुवेषे
दरीदृश्यते ताण्डवं हिंसनस्य
क्वचिद् वंचनायाः क्वचिल्लुण्ठनस्य
सहध्वे किमेतत् चरित्रावमानम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ रतिः कामचारे जनेषु प्रवृत्ता
मतिर्धर्ममार्गान्निराणां निवृत्ता
विपन्नं हि शीलं कथं रक्षणीयं
प्रजातं हि तद् दुर्जनक्रीडनीयं
किमधुनाऽपि शेध्वे सुशय्याप्रतानम् ।

६ न जातीयगर्वं क्वचिद् धारयध्वे
अरीणां च शाठ्यं हि तूष्णीं सहध्वे
निजा संस्कृतिर्वो न सम्माननीया
स्वदम्भार्चनाभावना पोषणीया
विधत्त द्रुतं स्वात्मरक्षाविधानम् ॥

७ क्वचिद् वाद्यवृन्दध्वनिश्चित्तहारी
बुभुक्षाशमाय क्वचित्पापकारी
अनुत्कोचकार्यं भवेद् विस्मयाय
विवशतावशं जीवनं शोचनाय
रुजां चिन्त्यतां भीषणानां निदानम् ।

८ इदं यौतुकं हा मृतिर्निर्धनानां
कलङ्को दुरन्तो भरतदेशजानां
विशन्ति प्रदीप्तानलं शीलवत्यः
अबोधा युवतयो वदत नो कियत्यः
निहत लोभदैत्यं मनुजतावमानम् ॥

९ जहित वैरभावं दहत भेदलङ्कां
प्रयात प्रगत्यै विधूयान्यशङ्कां
भवत संहता देशनिर्माणकामा
जगत्यां जयत सर्वबाधाविरामाः
प्रकुर्यात सौहार्दपीयूषपानम् ।

१० जना ये मिथः प्रेम संधारयन्ति
जगत्येकताया महत्त्वं विदन्ति
मिलित्वा विपत्सागरं संतरन्ति
प्रलुब्धा गुणैस्तान् श्रियः संश्रयन्ति
तनुत सर्वतः स्नेहवृत्तेर्वितानम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

११ प्रवाहैः प्रभाणां भुवं भारतीयां
स्थितो व्याप्य नित्यं जगत्कीर्तनीयाम्
अयं वेदभास्वांस्तमोव्रातहन्ता
कथं दैन्यदुःखैर्विदूना भवन्तः
चरत वेदधर्मं सुखानां निधानम् ।

१२ इयं भारती वन्दनीया जगत्यां
महानुद्गमो ज्ञानराशेर्बृहत्यां
इयं मङ्गलानां प्रसूतिः प्रकामम्
अवत्यत्र नः संस्कृतिं साऽविरामम्
अवत संस्कृतं गौरवस्यैकमानम् ।

१३ अलं वा विषादैरलं भीतिभावैः
अलं खण्ड्यतां दुर्नयः स्वानुभावैः
प्रधूमायितं यच्चिरं नैव शस्यं
प्रभाभासितं यत्क्षणं तन्नमस्यं
प्रजीव्यात लोके विधूयाऽरिमानम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२३. प्रेरणा

मानव रे मा भज मौनं
पौरुषमाश्रय जहि दैन्यं
पदं पुरस्तात् संस्थापय
समयममूल्यं मा यापय। १

स्वयमपि मार्गं रचयंश्चल
अवरोधानपि भिन्दंश्चल
तिमिरमुदस्यन् पुरः प्रचल
आलोकं विकिरन् प्रज्वल। २

उद्योगं प्रतिपद्यस्व
विफलो भूयः प्रयतस्व
चिन्तां सकलामपसारय
सन्देहध्वान्तं दारय। ३

यत्रापि त्वं भो यासि
क्वचिदप्येकाकी नासि
पथि पथिकाः सममेष्यन्ति
मार्गं त्वामुपदेक्ष्यन्ति। ४

येऽपि नरा नैराश्यगता
उद्योगादपि ये विरताः
सम्मोहं प्रतिपद्यन्ते
सामर्थ्येऽपि विपद्यन्ते। ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वयं प्रचल तानपि सह नय
सोत्साहं बाधा विगणय
घर्मार्तेभ्यो भव जलदः
अविलम्बं संवृष्टसुधः । ६

जयश्रियस्त्वामेष्यन्ति
भियः समस्ता भेष्यन्ति
वरं न मौनस्याश्रयणम्
निष्फलमत्र न कर्म कृतम् । ७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४. जीवनमधु

मन्ये जीवनमिह बहुकष्टं
भूयो बाधादंशैर्दष्टं
भयदुःखदीनताव्याकुलितं
छलदम्भानां पद्भिर्दलितं
संघर्षज्वालैरवलीढं
चिन्तानैराश्यजनितपीडं
बन्धो ! पुनरपि कमनीयमिदं
दिव्यं ललितं मृदुलं मदिरम् । १

इदमिन्द्रजालमिदमवितर्क्यम्
एतद् रहस्यशतकर्बुरितम्
अस्मिन् मधुनोऽपि कणाः सन्ति
मदिरा आशाच्छवयः सन्ति
सन्तीह न सर्वाः कृष्णनिशाः
शशिना ज्योतिष्मत्योऽपि दिशाः
जीवनमेतन्मधुमासोऽपि
शैशवमुग्धः मृदुहासोऽपि । २

एतच्छायातपसंसृष्टिः
ग्रीष्मान्ते सुखदसलिलवृष्टिः
प्रखरैः रविकिरणैः सन्तप्तः
अभिनन्दति जलदघनच्छायां
तद्वज्जानाति विपत्पतितो
मनुजः सुखमहिमानं सुतराम्
यश्चरति पुरस्तादश्रान्तं
मधु विन्दति लोके निर्भ्रान्तम् ३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२५. पर्यट विश्वम्

मुग्धमनुज रे पर्यट विश्वं
सन्त्यज गृहमोहं
विचारय संसारे कोऽहम्

विश्वमिदं सुन्दरतासारं
नवपदार्थभृतभाण्डागारं
प्रकृतिरमण्या मुक्तं द्वारं
नवनववेषं नानाकारं
भ्रम भूमौ मा भयमनुभव रे
सन्त्यज गृहमोहं
विचारय संसारे कोऽहम् । १

अभ्रंलिहमवनानि विलोकय
वेगवन्ति यानानि विलोकय
लोकानवलोकय बहुवेषान्
धारितनिजसंस्कारविशेषान्
अनुभवरत्नं विन्द विन्द रे
सन्त्यज गृहमोहं
विचारय संसारे कोऽहम् । २

क्वचिदुत्तुंगा भूधरमाला
वनराजिर्वा भाति विशाला
क्वचिन्निर्झराः क्वचित् प्रपाताः
जनाकर्षकत्वं परियाताः
विन्दामन्दं नयनानन्दं
सन्त्यज गृहमोहं
विभावय संसारे कोऽहम् । ३

३ प्रबोधनम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रामपत्तने पुरमवलोकय
तत्र विशेषानप्यालोचय
पश्य पश्य वैभवमदलास्यं
क्वचिदपि नैर्धन्यस्य विलासं
कन्दुकपातोत्पातं नियतेः
पश्य विगतमोहं
विचारय संसारे कोऽहम्। ४

उच्चावचाः सेतवः सन्ति
दीर्घा राजपथाः विलसन्ति
उत्तरंगसागरवत्कान्तं
पश्य जनौघमापणे यान्तं
क्रेता भव साक्षी वा भव रे
सन्त्यज गृहमोहं
विचारय संसारे कोऽहम्। ५

प्रतिभाणां परिपश्य विलासं
प्रोन्नतमपि विज्ञानविकासं
ऐश्वर्याणां रुचिरनिवासं
श्रमशक्तीनामुज्ज्वलहासं
किंचित्प्रेरणमप्यासादय
सन्त्यज गृहमोहं
विचारय संसारे कोऽहम्। ६

कश्चिन्मुण्डी दण्डी जटिलः
कृष्णो धवलः सरलः कुटिलः
श्मश्रुलतुन्दिलदीर्घाः पीनाः
क्षीणाः केचित् काये लीनाः
पश्य पश्य वैविध्यनिधानं
विश्वं धुतमोहं
विभावय कुत्राहं कोऽहम्। ७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्रक्ष्यसि कंचिल्लक्ष्मीभक्तं
उन्मत्तं वा कामासक्तं
कश्चिद् यथालाभसन्तोषी
कोऽप्युत्कोचग्रहणाद् दोषी
नैकरूपवद् भवमवलोकय
सन्त्यज गृहमोहं
विभावय संसारे कोऽहम् । ८

तरुणान् द्रक्ष्यसि सागरतीरे
मीनेभ्यो धृतजालान् नीरे
नारिकेलतरुमूले सुप्तान्
कामिजनानपि पानोन्मत्तान्
कृतनीडान् स्वे स्व संसारे
अभिनन्दय समुदं
विचिन्तय विश्वेऽस्मिन् कोऽहम् । ९

काः का भाषा नो भाष्यन्ते
के के वेषा नो धार्यन्ते
खाद्यमखाद्यं किं नाश्नन्ति
मधुरकटुकपेयानि पिबन्ति
पश्य कथं व्यापारिकवर्गः
कुरुते वसुदोहं
विचारय संसारे कोऽहम् । १०

विश्वं पश्येः बहुविस्तारम्
उक्तं कैश्चित् सारमसारं
तमपि विद्धि सर्वं यदधीनं
विश्वपतिं मायापटलीनं
मा मायामनु धाव धाव रे
सन्त्यज गृहमोहं
जप जप जप नित्यं सोऽहम् । ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२६. परिदेवितं सकलं वृथा

पीतं न भक्तिरसामृतं
समुपार्जितं ज्ञानं वृथा
विहितं हितं नहि जीवने
तज्जीवनं नीतं वृथा। १

आलोकदर्शनमानसं
सीदति तमो जगतीतले
द्वारं पिधाय बिराजसे
तव शास्त्रपांडित्यं वृथा। २

का संस्कृतिर्जातिश्च का ?
मद्देशजा का भारती ?
हित्वाऽखिलं स्वोदरभृतः
तव वैभवं स्फीतं वृथा। ३

परदेशपेशलवेषवान्
परभावभाषागर्वितः
निजसम्पदं मनुषे तृणं
तव भारतीयत्वं वृथा। ४

उप्तं कलहबीजं मिथः
कोपानलार्चिर्दीपितं
अधुनाम्बुने परिखिद्यसे
परिदेवितं सकलं वृथा। ५

मदिरा प्रमादमयी त्वया
नित्यं जगत्यां पीयते
परिवंच्यसे च मनोरथैः
दैवं परिक्षिप्तं वृथा। ६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

इह सम्पदां परतो भयं
स्वेभ्यो भयं वा विद्यते
स्वामी स्वयं चेल्लुण्ठकः
चर्चाऽपि रक्षाया वृथा। ७
सर्वत्र भुवि दम्भार्चनां
प्रविलोक्य मा भूर्विक्लवः
युगधर्म ईदृश एव भोः
चिन्ताकृशत्वं ते वृथा। ८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२७. विज्ञानयुगीनं मानवं प्रति

१ रे मनुज ! विज्ञानगर्वित !
यान्त्रिकोत्कर्षप्रहर्षित !
रे अहंमानप्रपीडित !
विपुलसंपद्भिर्विमोहित !
अद्य भोश्चक्राधिरूढ—
स्तीव्रगतिमयतां गतस्त्वं
या दुरापा पूर्वजानां
तुङ्गतां तां रेगतस्त्वम् ।

२ प्राप्तभव्योत्कर्षगरिमा
लोकविजयाभ्युद्यतोऽसि
त्वं प्रकृत्यवगुण्ठनानाम्
अपनयार्थसमुद्यतोऽसि
नास्ति चित्रं यत्समस्तं
विश्वमावरणेन हीनं
स्वीकरोतु तव प्रभुत्वं
तव महिमजलधौ निलीनम् ।

३ गर्वमुच्चैस्त्वं प्रधारय
नर्तयेः लोकं समस्तं
प्राप्तविज्ञानप्रसादो
धारयस्व निधिं प्रशस्तं
दारुपुत्तलिकेव सर्वा
संसृतिस्ते क्रीतदासी
तव निदेशे वर्तिनी सा
त्वं प्रदीप्ताऽऽभाविभासी ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ कथय रे, कस्त्वां रुणद्धि
चन्द्रलोकं त्वं गवेषय
शु क्र भौ मा दि ग्रहान्तः
यानजालं त्वं प्रवेशय
अ ति सु दूरभवेऽन्तरिक्षे
रचय वसतीनां शतानि
क्रीड विभवैः प्रीतहृदयो
विन्द मनसः काँक्षितानि ।

५ किन्तु हे मनुसुत ! कथय मे
तव धरा किं दीनदीना
या प्रधर्त्री वैभवानां
सा किमर्थं कान्तिहीना
अद्य मानवता प्रतपते
कथमरे गतजीविताऽऽशा
सर्वनाश - विशंकिनी सा
कम्पते भूत्वा हताशा ।

६ या स्मितिस्तस्याः सुवदने
विकचपाटलवद् व्यराजि
या द्युतिश्च तदीयदेहे
व्योमविद्युदिव व्यभासि
अद्य केन शठेन तस्या
दीप्तिराच्छिद्यत समस्ता
यत्र तत्रा ऽऽ हिण्डते हा
सा न किं योषेव मत्ता ।

७ अद्य परिचिन्तय विचारय
तावकीना या दशाऽस्ति
दे ह म न सो रि न्द्रि ये षु
हन्त यान्त्रिकता प्रशास्ति
मधुरमृदवो हार्दभावाः
स्वार्थबलिवेदिं प्रयाता
बन्धुताऽऽस्ते नामशेषा
शुष्कतां मैत्री प्रयाता ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

८ प्रत्यहं प्रतिपलमियं ते
व्यस्तता या वर्धमाना
तावकीं जीवनसरसताम्
अशितुमेवाऽऽशुप्रयाणा
मा गमस्त्वं यन्त्रजडतां
जीविनां सर्वोत्तमोऽसि
अमृतपुत्रवरेण्यपदलाभे
न किं दत्तोद्यमोऽसि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२८. उत्तिष्ठत जागृत हे आर्याः!

उत्तिष्ठत जागृत हे आर्याः
संस्कृतिरमणी परदेशीया
वासं कुरुतेऽस्मद्गृहे कथं
निजनिधिं प्रशस्यतमं भूमौ
क्षुद्रं मन्महेऽद्य हन्त कथं
प्राचामादर्शपथाद् भ्रष्टाः
छिन्नाभ्रसमाः किं प्रविदार्याः। १

परभाषायां परमावेषु
गर्वो निष्ठा श्रद्धाऽस्माकं
स्वाध्यायरहितया वेदानां
स्तुत्या शाब्दिक्या किं लभ्यं
मोहप्रमादमदिराप्रभवाः
विकृतयस्त्वरितं ह्यपसार्याः। २

कुप्रथापंकमग्ने लोके
हीनोन्नतभावे परिपुष्टे
ध्वान्ते परिवृद्धिं समुपेते
बलवत्तां चोपेयुषि दुष्टे
आतंकदंशदष्टे सकले
सन्नीतिपथाः किं विस्मार्याः। ३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलमलं स्वार्थसाधनादिधिना
चिन्त्यं सर्वोपरि राष्ट्रहितम्
आ स्ता म ति दू रे ऽहं भावः
पुष्यतु सर्वत्रैक्यं नित्यं
काश्मीरं केशरकेदारम्
अनलादवितुं यत्ना धार्याः। ४

सत्यपि विद्याविभवे विपुले
प्रखरायां प्रतिभायां सत्याम्
उपहास्या हन्त भवामः किं
सत्यां रिपुबलसूदनशक्त्यां
सविवेका समयोचितनीतिः
कथमस्माभिर्नहि संधार्या। ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

२९. पदं पुरः प्रवर्धताम्

स्वदेशमानरक्षणे पदं पुरः प्रवर्धताम्

भारतं मम प्रियं क्षितेर्विभूषणं परं
परम्पराभिरक्षणे रतं श्रियो निकेतनं
दुराशयश्च यो जनोऽस्य मानभङ्गभीहते
तद्विभञ्जने तृणं तृणं प्रभञ्जनायताम् । १

अभिलषामि वैरिणां निरोद्धुमग्रगं पदं
आततायिनामथो निहन्तुमुद्धतं मदं
गिरीन् समीक्ष्य सम्मुखे मनो न मे प्रकम्पतां
राष्ट्ररक्षणे हि जीवनं प्रयातु धन्यताम् । २

न हीदृशं तमः क्वचिन्न नाशितं हि यन्मया
न कण्टकं तथाविधं समुद्धृतं न यन्मया
वने वने विगाहनं नगे नगे ममाटनम्
जयं श्रियं ददातु देशगौरवाय कल्पताम् । ३

यत्र भात्यनेकवर्णपुष्पवल्लरीचयः
सौरभं मनोहरं प्रसारयन् समन्ततः
वाटिका विभूषिता मदीयदेशजा सदा
विकासिता सुवासिता सतां मुदे प्रजायताम् । ४

वैभवैर्विमण्डिता सुशस्यश्यामला सदा
वीरवेषधारिणी च वैदुषीविभास्वरा
कलाकलापराजिता सुनीतिगंधवासिता
भारती वसुन्धरा नवाऽऽभया विराजताम् । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३०. इतो निर्यात मधुवाताः !

प्रबोधं नोपयास्यधुना
विलम्बितजागरैस्ते किम्
अतीतायां निशायां
भास्वरैर्विद्युद्विभासैः किम् । १
स्वयं सृष्टैरनेकैर्वर्ग—
भे दै र्ज र्ज रे देशे
शिरोधूननपुरस्सर—
मश्रुपातैर्वाऽनुतापैः किम् । २
उलूकैरावृतं ह्येतत्
समस्तं भव्यमुद्यानम्
इतो निर्यात मधुवाताः !
मुधा कलिकाविकासैः किम् । ३
पदं क्षिप्तं यदा बन्धो !
त्वया किल राजनयपंके
कुनीत्या किं कुरीत्या किं
विवादैः किं प्रवादैः किम् । ४
विजयकामा न गणयन्ते
तिथीर्वा वासरांल्लोके
रिपूद्धरणाऽभियानेषु
वृथाऽऽशंकावितानैः किम् । ५
मिथो द्वेषानलैः सकले
समाजाऽनोकहे दग्धे
प्रवालानां मृदूनामाशया
जलसेचनैर्वा किम् । ६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रिपूणां निन्द्यचेष्टाभिः
प्रणष्टे मातृमूमाने
समुच्छ्रितवैभवैस्ते किं
मधुरवंशीनिनादैः किम् । ७
स्ववेश्मस्थेन दीपेन
गृहं मे ज्वालितं सर्वं
पराधिक्षेपणैर्वा किं
प्ररुदितैः किं विलापैः किम् । ८
कदा वातोऽनुकूलः स्यात्
कदा ह्याशाः प्रसन्नाः स्युः
प्र ती क्षा यामनुद्यमिनां
दिनैर्मासैश्च वर्षैः किम् । ९
जयन्ति भ्रान्तयोऽनेकाः
सुखं जीवाभि यत्कृपया
विनाऽऽभिः शल्यतुल्यं
जीवनं स्याज्जीवनीयं किम् । १०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३१. वितरामो मोदं जने जने

आयात बन्धवो मोदभरं
वितरामो लोके जने जने।

विलसतु वसुधा प्रभयाऽविरलं
माद्यतु मधुवातैर्दिशा दिशा
गुञ्जतु कलगानं विहगानां
रमयतु चन्द्रिकया निशा निशा
नन्दतु सर्वः सर्वत्र सदा
प्रसरतु सुरभिर्वातावरणे १

तिमिरं न तुदेत् कञ्चिन्मनुजं
परितः प्रसारयेमालोकं
छित्त्वा मदमोहजनितजालं
जनमत्र विदध्मो गतशोकं
विकसतु सविलासं स्मितकलिका
निर्बलदीनानामपि वदने २

कस्यापि भवेन्नो श्रममोषः
पीड्येत न वा कोऽपि क्षुधया
तृप्यतु दीनो नैराश्यगतो
धनवसनैराश्वासनसुधया
उपयातु विकासं बन्धुत्वं
ग्रामे नगरे सदने सदने ३

परियातु हि वैरकथा विलयं
समुदेतु मनसि नवला प्रीतिः
अपयातु समस्तं नैशश्यं
विलसत्वधरे मधुरा गीतिः
रचयामो नवनिर्माणकथां
मङ्गलमाविष्कुर्मो विपिने ४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्थो रागः

प्रशस्तिपयस्विनी

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३२. मानवगरिमा

त्वां मानव भूगौरव ! वन्दे
कस्त्वादृक्षो भुवनालिन्दे ।

दुर्जयसाहससमुपेतं त्वां
शृङ्गाणि गिरीणां वन्दन्ते ।

चित्रा त्वं भागवती रचना
नवनवरचनासु परमनिपुणा ।

जलनिधयो मार्गं यच्छन्ति
ज्योतिर्मयताराः पृच्छन्ति ।

कस्यायं भो महिमा सुमहान्
एत्यन्तरिक्षमपि कः श्रीमान् ?

क्षीणोऽपि न यो दैन्यं भजते
विफलोऽपि पुनर्घोरं यतते ।

संकल्पः शैलशिलाकठिनः
बाधासु न विश्वासो मलिनः ।

नैतस्य संयमो विश्रान्तः
खिन्नोऽपि पुनर्यो विक्रान्तः ।

नवनवगवेषणे संसक्तः
तत्त्वान्वेषी स कलाभक्तः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्सौन्दर्यं निर्माणानां
लालित्यं कलानिधानानाम् ।

श्लाघ्यं हे मानव ! यज्जगतां
वीक्षे तव निष्ठां तत्र रताम् ।

त्वं विपुलकल्पनासाहाय्यैः
नानास्वप्नान् संमूर्तयसे ।

सेतूनां निर्माणं कुरुषे
सौन्दर्यमुपलमध्ये धत्से ।

ऐलोराऽजन्ता - ताजमहल –
निर्माणानि त्वां प्रथयन्ते ।

मानवसमाज - सौविध्यार्थाः
वैज्ञानिकयत्ना राजन्ते ।

दीव्यसि कर्माराधनसक्तः
नयने संघृतमधुरस्वप्नः ।

खेलन्ति मानसाकाशे ते
नानाभावाः शबलितवर्णाः ।

अपराजितसंकल्पानां ते
भ्राजिष्णुर्भाति विपुलविभवः ।

श्रमवारिकणान् वहतो वदने
भा ती न्द्र धनुःशोभातिशयः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३३. जयतु भारतम्

हिमकिरीटं राजते भाले त्वदीये
क्षालनां पदयोः पयोनिधिरातनोति
ऋतुगणो भव्यां विभूषां संविधत्ते
चित्रविहगालिः स्तुतिं मधुरां करोति। १

तुङ्गतां ते प्रथयतेऽसौ पर्वतेशः
निर्झरा गरिमाणमुच्चैः संगिरन्ति
अनुपलं संदृश्यते सुषमा नवीना
सौरभं मलयाद्रिपवमानाः किरन्ति। २

जन्म लब्धुं यत्र देवा अप्यलुभ्यन्
गौरवं तत् परममहनीयं दधासि
विविधविद्यानामसि क्रीडास्थली त्वं
संस्कृतीनां दिव्यया विभया विभासि। ३

कलयसे भारत! कलानां कलनिधानं
यान्त्रिकोत्कर्षश्च तेऽद्य बिलोकनीयः
शान्तिमान्तरिकीभवाप्तुमिहोपयाति
वैभवाद् भीतो नरो देशान्तरीयः। ४

प्रांगणे प्रविचरति ते गीतार्थगन्धः
शौर्यगाथा यत्र दाशरथेः पुनाति
उपनिषद्भागीरथी प्रसरत्प्रवाहा
आकुलेभ्यो निर्वृतिं परमां ददाति। ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मभाषाजातयो मैत्रीभुपेता
यत्र सानन्दं त्वदीयाङ्के लसन्ति
मठ-विहाराश्रम-कुटी-प्रासादलक्ष्म्यः
संश्रिता एकायनं प्रेम्णा वसन्ति। ६

शोभसे बहु धारयत् त्वं वीरवेषं
राजसे क्वचिदावहन्मुनिधीरभावं
उत्सुकं वाऽसि क्वचित्पंचाग्नितपसे
विविदिषसि देहे क्वचिद् ध्यानप्रभावम्। ७

साधनामार्गे क्रियायोगेऽसि मग्नं
भावलीनं वा मनो भक्तौ निधत्से
त्वं क्वचित्परमार्थसाधनदत्तचित्तं
लोककल्याणार्थकर्मचयं विधत्से। ८

अस्मि चकितस्तावकैः रूपैरनेकैः
त्वं विभूतीर्भगवतो विविधा दधासि
किन्तु दैवविडम्बनां सम्पश्यतो मे
मानसे विपुलां व्यथां भूयो ददासि। ९

प्रखरशक्तिमतोऽपि ते दैन्यं किमर्थं
तव समन्ताज्जाल्मनेतारः किमर्थं
क्षुद्रजम्बुकगणकृता ते धर्षणा किं
वैरिविहिता व्यंग्यवचसां वर्षणा किम्? १०

पतसि निजमौग्ध्याद् वशे दुरिताशयानां
क्रूरकुटिलस्वार्थबुद्धिप्रेरितानां
पिबसि तत्सङ्गादहो व्यामोहमदिरां
दूयसे त्वं व्याहताभीष्टं च नितराम्। ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद् गतं हे भव्यभारत ! नानुशोच्यं
वर्तमाने ह्येव चेतः संनियोज्यं
धारयस्व पुनः स्वपौरुषदीप्तिमुग्राम्
उग्रकर्मवतां विखण्डय हिंस्रमुद्राम् । १२

सर्वतः समवेतधूर्तकुलं प्रतर्दय
मनुजतायै विगतमानधनं समर्पय
गौरवश्रीस्ते पुनर्गगने विभातु
मानसे मुदिता सदा पदमादधातु । १३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३४. भूमौ वीरवरा विजयन्ते

दूरसमुज्झितबन्धनपाशा
भूमौ वीरवरा विजयन्ते

१ दानवभीतिसमाकुलितायाः
संकटपीडितमानवतायाः
ये परिरक्षणकर्मणि निरताः
किं ते सुखशय्यां विषहन्ते
दूरसमुज्झित···

२ साध्यं येषां परमाराध्यं
लोके किन्तेषां दुःसाध्यं
सोपानीकृतविघ्नशिलौघाः
श्रीभिः सुतरां संसेव्यन्ते
दूरसमुज्झित···

३ बाधानामुत्तुंगा गिरयः
ममतामदमोहाद्या अरयः
दृढसंकल्पान् वीक्ष्य समक्षं
शीर्षं स्वं त्वरितं नमयन्ते
दूरसमुज्झित···

४ झंझावातो विद्युन्माला
गिरिवरपंक्तिः सानुविशाला
स्यादपि कामं बन्धनशतकं
वीरा नैतैरवरुध्यन्ते
दूरसमुज्झित···

५० इत्यलम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ यैस्त्यक्तं रम्यं सुखभवनं
येषामिष्टं भूमेरवनं
प्रा णपरित्यागस्तृणकल्पः
किं ते नरसिंहा ध्वंसन्ते ।
दूरसमुज्झित···

६ लक्ष्यमवाप्तुं ये प्रयतन्ते
उद्योगे नित्यं प्रमन्ते
तान् विजयोद्योतैर्विभासितान्
गिरिगुरुशृंगाण्यपि वन्दन्ते ।
दूरसमुज्झित···

७ अशितमनशितं पीतमपीतं
अनुकूलं किं वा विपरीतं
स्वप्रजागरौ स्तुतिमथ निन्दां
जयकामा नैतद् गणयन्ते ।
दूरसमुज्झित···

८ हर्षविषादौ जीवितमरणे
यस्य समाने वृद्धिक्षरणे
पौरुषशरणं जगदाभरणं
कं जयलक्ष्म्यो नो वरयन्ते ।
दूरसमुज्झित···

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३५. मदीयं ग्रामभारतम्

जयति मदीयं ग्रामभारतं
नैसर्गिकपरिवेषं
पृथुलविस्तरं कृषिधनधनिकं
शा न्त म नो ह र वे षम् । १

शस्यश्यामं भुवो मण्डलं
नीलाम्बरसच्छायम्
अवलोकयतां दृशं रञ्जयद्
रोमाञ्चयते कायम् । २

क्रीडाजिरं विशालं प्रकृतेः
ग्रामजीवनं भाति
जलपवनध्वनिदूषणरहितं
नि र्म ल त र मा भा ति । ३

सर्षपभूमौ लतासखीभिः
पीताम्बरपरिधाना
प्रकृतिनटी परितः पश्यन्ती
लसति यथा स्मयमाना । ४

क्षितिजधरण्योरत्र सङ्गमो
भवति परमरमणीयः
पवनतरङ्गितहरितसागरो
नयनपथं नयनीयः । ५

सरलं विमलं लोकजीवनं
प्रवहत्सलिलसमानं
मुग्धं नगराडम्बरशून्यं
बा ल व यः प्रतिमानम् । ६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परम्परापालनधृतराग
चमत्कृतौ सश्रद्धं
नात्युत्सुकमिव नवतादीप्त्यां
नि ज वि श्वा सैर्बद्धम् । ७

जानुदघ्नवसनं परिदधतः
स्कन्धे कम्बलवन्तः
ग्रामीणा जीवनसंघर्षे
साहसिनो बलवन्तः । ८

मृत्स्नायामनुरागस्तेषां
मृत्स्नारचितगृहाणि
मृत्स्ना दत्ते शस्यसम्पदं
मृत्स्ना फलपुष्पाणि । ९

जीवनाङ्कुरोद्भव एतस्याम्
अस्यां जीवनकान्तिः
इयं प्रोल्लसद्धासो भव्यः
एषाऽन्तिमविश्रान्तिः । १०

गोमयोपलिप्तास्तद्गेहाः
गोमयभृताः प्रकोष्ठाः
गोरससेवनसोत्काः सर्वे
गो हुं कृ ति म द् गोष्ठाः । ११

सत्यपि नैर्धन्ये मुंचति नो
क्वचिदपि तानौदार्यं
सन्तोषद्रविणे विपुले सति
भवति न धैर्यं हार्यम् । १२

घर्मांशोस्तीव्रातपतप्तं
दिनं भवेद्वा रजनी
कृषिकार्ये श्रमभृतां केवलम्
पूज्यतमा भूजननी । १३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृषिफलदर्शं मनोमयूरो
नृत्यति कृषीवलानां
पूर्वायासं नो गणयन्ते
ते शीतोत्तापानाम् । १४

ग्रामं ग्रामं गामं गामं
यद्विलोकते पथिकः
एवं तच्चर्चयते मित्रे
यथा कश्चिदान्तरिकः । १५

जलघटयुगलं शिरसा धृत्वा
करधृतमहिषीदामा
आलीभिः संलापं कुरुते
पथि यान्ती सा रामा । १६

एषा काचिद् ग्रामवधूटी
धृतरक्ताम्बरशाटी
मधुरमिक्षुदण्डं चूषन्ती
त्वरितपदा संयाति । १७

इन्धनदीप्तहुताशं शीते
ग्रामीणाः प्रतपन्ति
कथाप्रसंगे वदनजृम्भणं
कृत्वोच्चैर्विहसन्ति । १८

यान्त्येता अवगुण्ठनवत्यः
पथि काश्चित् सन्नार्यः
नवविज्ञानगवाक्षादायन्
पवनो यतो निवार्यः । १९

युवतिजनो दोलामारूढो
गायति मधुरं गीतं
दोलायितचित्तं तरुणानां
माद्यति रागपरीतम् । २०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पक्वविलूने धान्यप्रकरे
मुदितकृषीवलवृन्दं
मण्डलस्थमुद्गायति नृत्यति
ढ क्का ना दो न्म त्तम् । २१

क्वचित्पल्वले सह महिषीभिः
बालाः क्रीडानिरताः
रेणुरूषिताः अपि विहरन्ते
रथ्यायां गतचिन्ताः । २२

ह्रेषति वडवा, शनैश्चलन्ती
महिषी व्रजमभियाति
खाद्यान्वेषि सगर्गुरशब्दं
शूकरकुलं प्रयाति । २३

सकलमहः कर्षणतः श्रान्तः
सायं गोष्ठनिषण्णः
रोमन्थं वर्तयते शनकैः
गणो वृषाणां गुण्यः । २४

दधि-मन्थन-निर्घोषो मधुरो
जागृतिगीतसमानः
राष्ट्रं मोहविनिद्रं कुरुते
मुदमतुलां तन्वानः । २५

सर्षपशाकं मक्कारोटीः
गुड़ - घृत - तक्रसमेताः
अक्का यच्छति पश्चाद् गच्छति
हस्ताद् हस्तं हुक्का । २६

बाष्पैर्गुड़गुड़मधुरध्वानैः
कर्षति जनं प्रयान्तं
नुदति समस्तं दुःखं हुक्का
तन्वन् हितं नितान्तम् । २७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलकूपोद्गतपयःप्रवाहो
धावति परिगतवेगं
धराजनन्यङ्के लयमेतुं
विशति त्वरासमेतम् । २८

ज्वलद्वह्निपरितप्तकटाहे
इक्षुरसैर्निष्पाद्यं
गुडमाकारयते निजगन्धै-
रारात् कृषकसमाजम् । २९

क्वणद्रणद्घण्टासंनादः
सुभगः शंखध्वानः
देवमन्दिरे संसूचयते
गोधूलेः वेलां नः । ३०

आतिथ्यैः विश्रम्भालापैः
अत्र जीयते हृदयं
यान्ति जना इह सहभागित्वं
विपत्सम्पदोरनिशम् । ३१

ग्रामदर्पणे यदा भारतं
संक्रान्तं प्रतिभाति
छलनामयी नागरी मूर्ति-
स्तदा मनस्तो याति । ३२

अव्यवस्थया जनिताभावान्
धीरतया विषहन्ते
राष्ट्रोन्नतिसन्मूलं ग्रामा
दाक्षिण्यं पद्यन्ते । ३३

क्वचिच्छासनं कुरुते दैन्यम्
अन्यत् सकलं हेयं
पूर्वपुरुषखातादिह कूपात्
क्षारं नीरं पेयम् । ३४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्युद्दीपदीप्तिसमकालं
नवविज्ञानपयोदः
किरति क्वचिन्नवाम्भोबिन्दून्
जनितसकलजनमोदः । ३५

विपुलायासा त्वक्षरमैत्री
किं नः पाठ्ये श्रव्ये
ग्राम्यैरिति कृत्वा प्रणीयते
प्रेम मादके द्रव्ये । ३६

ऋणघृतपानं चार्वाकाणां
चेतो मुदा बिभर्ति
मद्यमधुरिमा ग्रामीणानिह
उल्लासेन पिपर्ति । ३७

काठिन्योपार्जितवित्तानां
कुत्र भवेद्विनियोगः ?
उद्वाहे व्यसने भूकलहे
धात्रा लिखितो योगः । ३८

भौतिकता लम्बयते हस्तौ
नगरीकर्तुं ग्रामं
कथं तोषयेदद्य यशोदा
मृदुनवनीतैः श्यामम् । ३९

वितरतु कल्याणं सन्मतिमपि
प्रभुरखिलेशः सततं
ग्राममयं मे भव्यभारतं
लभतां मंजुलमुदयम् । ४०

ग्रामचत्वरे खट्वास्थानां
वृद्धानां प्रौढानां
प्रचरतु चिरं प्रेमसंगोष्ठी
हास्यविनोदपराणाम् । ४१

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३६. संस्कृतवाणी

१ सृष्टेरुणोदयवेलाया-
मात्मानमवालोके जातां
शब्दार्थमयं शुचि परिधानं
दधतीं तारुण्यमथ प्राप्तां

परमेशकृपावशतो वर्णः
सर्वो मे मन्त्रमयो जातः
आविर्भूतं वेदज्योतिः
तिमिरस्य चयो विलयं यातः

सुरगणैः प्रतिष्ठां संनीता
स्वीये हृदये वदनाम्भोजे
मनुजैः व्यवहारपदे निहिता
देशे देशे गेहे गेहे

ऋषिभिर्गीता मुनिभिर्ध्याता
परिशुद्धा मन्त्रमयी वाणी
नाम्ना व्याजह्रेऽहं विबुधैः
संस्कृतभाषा संस्कृतवाणी ।

२ वैज्ञानिकता भाषाध्वनिषु
लिप्यामपि रचनासुन्दरता
नवपदनिर्माणकरी क्षमता
संस्कृतवाण्या मे श्लाघ्यतरा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सं स्का रा णा मा चाराणां
व्यवहारविचाराणां वाणी
अक्षरमात्रागणनाद् यमिता
जाता संगीतमयी वाणी

ध्वन्यात्मकवर्णवितानवती
नाना - छन्दोऽलंकृतचरणा
नर्तननिपुणेव नटी रङ्गे
नू पु र झंकृतिझंकृतचरणा

साहाय्यमपेक्षन्ते नित्यं
नवपद रचने प्रान्तीयगिरः
उपजीव्यतया सौन्दर्यदृशा
नवपदजातैः पुष्णामि च ताः ।

३ विश्वे विभिन्नदिग्भागेषु
पश्यामि कदाचिद् विहरन्ती
हिब्रू-जर्मन-लैटिन- रशियन-
ग्रीकाद्याः पुत्रीः दौहित्रीः

नानावर्णा नानावेषाः
धारितभौगोलिकसंस्काराः
नि व सन्ती र्ज नसमुदायेषु
पोषितनिजलघुगुरुपरिवाराः

भा षा विज्ञा नविदोऽस्माकं
विस्मृतसम्बन्धं पूर्वतनम्
आभाष्य पुनर्ब्रुवते वाचां
तासामेकान्वयतो जननं

वसुधामखिलां निजपरिवारं
सं वी क्ष्या नन्दपुलकिताया
गातुं मे मनस्तदा कुरुते
हरिमहिमानं स्फुरदधरायाः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ वेदस्तु विभोर्निःश्वसितमयो
विज्ञानमयो ऽखिलभूतहितः
प्रथमा महती रचना जगतां
छन्दोग्रथिता गीर्वाणगिरा
तन्मन्त्रजपे निरताः केचित्
केचिद्यागैः प्रीणितदेवाः
त त्त स्वविचारार्पितजनुषो
मनुतनुजनुषो भुवि महनीयाः
आत्मानमहं धन्यां मन्ये
निगमागममयकायो यस्याः
सद् ग्रन्थ रच यि तारोऽनेके
ऋषयो मुनयोऽखिलविश्वहिताः
तेषां महनीयचरित्राणां
तपसा संधारितभूरिबला
पठिता रटिता मननं नीता
गीता ज्ञाताऽहं कामदुधा ।

५ श्रीवृद्ध्यै मम कवयो ऽसंख्याः
कृ त बहुयत्नास्तत्परमनसः
सत्काव्य-गद्य - चम्पू-रूपक
रचना महतीर्व्यदधुश्च पुरा
वाल्मीकिरथो व्यासो भासः
कविताकामिन्या मृदुहासः
बाणो जयदेवो भवभूतिः
काव्योद्याने किल मधुमासः
भा र त संस्कृतेरमरगायक-
कविकालिदासतुल्याः केऽन्ये
स र्वे ऽ प्यानतशिरसस्तस्मै
यद् दत्तं तेन सकलजगते

इन्द्रधनुः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आयुर्वेदे ज्योतिःशास्त्रे
व्याकरणे धर्मे नयशास्त्रे
अध्यात्मे नाट्यकथाशिल्पे
के समाः कथय सकले विश्वे ।

६ बहव्यः संस्था यद्यपि देशे
विदुषामपि भूयिष्ठा संख्या
अर्वाचीनाः प्राचीना वा
दिङ्मात्रमुदाह्रियतेऽत्र मया

भात्यखिलभारतीया संस्था
संस्कृतसम्मेलननामयुता
परिषत् संस्कृतसेवानिरता
नाम्ना प्रथितेन्द्रप्रस्थीया

एषा च देववाणीपरिषत्
विविधं सुरगिरं समर्चयते
संस्कृतसेवासंस्थानं वा
विमलां कीर्तिं संधारयते

कर्ता श्रीराधासुधानिधेः
अभिनन्द्यः श्रीहितहरिवंशः
श्रीरूपजीवगोस्त्रामिद्वय-
कीर्त्या राजन्ते सर्वदिशः ।

७ श्रीजगन्नाथपण्डितराजो
रससिद्धकवीनां ख्याततमः
वेदान्तदेशिकः काव्यपटुः
क्षेमेन्द्रो मुनिविद्यारण्यः

बुधवरमधुसूदनसरस्वती
व्यासः शिवराजविजयकारः
गिरिधरशर्मा दीनानाथः
संस्कृतवाण्याः सदलङ्काराः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैयाकरणानां मूर्धन्यः
श्री चा रु दे व पण्डितवर्यः
भट्टः श्रीमान् मथुरानाथो
ह्व या व र्जकवाङ्माधुर्यः

यः शास्त्रविदां धुर्यः कविराट्
सद्ग्रन्थनिर्निर्मितिलब्धयशाः
श्रीमानभीरचन्द्रः शास्त्री
शशिधरशर्मा विद्वद्वर्यः ।

८ एवं शास्त्राणां मर्मविदो
नानाविद्यानां वक्तारः
साहित्यविधानां विविधानां
स्रष्टारो ह्याविष्कर्तारः

सत्यपि संघर्षमये समये
प्र ब लो त्साहैर्द्रावितबाधाः
लो का ना भालोकस्तम्भाः
केषामिह लोके नाराध्याः

या क्षमा विचाराविष्करणे
योग्या वाचां चालङ्करणे
यस्या भात्यद्भुतपदकोषः
यस्यां सर्वाः साहित्यविधाः

यत्काव्यसुधां पायं पायं
निर्वृतिमतुलां लभते प्राणी
मधुरा सरसा संगीतमयी
विख्याताऽहं संस्कृतवाणी ।

९ ग म्भी र घोषकवितापाठी
श्रीश्रीनिवास आचार्यवरः
भास्कराचार्य आलङ्कारिक—
न व लो कगीतरचनाचतुरः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोकिलकण्ठो नवगीतिपटुः
रा जे न्द्रमिश्रकविताकान्तः
गायति मधुरं 'भाति मे भारतम्'
कविकण्ठीरवो रमाकान्तः

सत्यव्रत - शुक्लरमेशचन्द्र
वर्णेकर - बेलणकरादयः
कविरत्नं ठाकुर ओम्प्रकाश
इत्येवं समकालिककवयः

नलिनी-लीना-पुष्पाः सर्वाः
कवयित्रीणां परमप्रथिताः
गीतैर्ललिताभी रचनाभिः
सततं मदर्चनायां निरताः ।

१० गाण्डीव-सुधर्मा-नवप्रभात—
ऋत-ऋतम्भरा-गीर्वाणसुधा
मेधा - दूर्वा - चन्दामामा
प्रतिभा-संगमनी- शोधप्रभा

परमार्थसुधा - दिव्यज्योतिः
संवित्-भवितव्य-विश्वभाषा
व्रजगन्था - संस्कृतामृतं च
पारिजात-भारती-प्रियंवदा

इदमर्वाचीनसंस्कृतं च
शारदा-मनोरमा-मालविका
स्वरमंगल-लोकसंस्कृतं च
सागरिका गुञ्जारवस्तथा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्वसंस्कृतमथो देववाणी
पत्रे भारतोदय - गैर्वाणी
एतैरन्यैः ललितैः पत्रैः
सप्राणाऽहं संस्कृतवाणी ।

११ एषा न केवलं भाषाऽहं
नो वाग्व्यवहाराणां वाणी
सन्देशममरताया लभते
मत्तो नैराश्यगतः प्राणी

मय्याशायाः दीप्तं ज्योतिः
विश्वासस्योज्ज्वल आलोकः
जीवेम शतं वर्षाणि वयं
प्रवयन्तः कर्मपटं च मुदा

विलसन्तुतरां साहसभावा
आस्तां दूरे नैराश्यकथा
देशो विलसेत् पौरुषदीप्त्या
सुखकरी न जातु पराश्रितता

एवं विध सू क्ति सु धाधारा
सत्सा हि त्या म्बुधिसम्मूता
अपवाह्य समस्तं नैराश्यं
प्रददाति पराश्चित्ते प्रमुदः ।

१२ विपिने मुनिपर्णोटजमध्ये
सु र म न्दि रस्थविद्याकेन्द्रे
आचार्यकुले च गृहस्थानां
धनिनामावासे वा हर्म्ये
तीर्थे च विहारे मठमध्ये
प्रीत्या शालासु विहरमाणा
राजाश्रयमनपेक्ष्यापि विभोः
कृपया सर्वत्राद्रियमाणा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्प्रत्युपेक्ष्यमाणा लोकैः
भौतिकताया दीप्त्या मुग्धैः
अ प चीयमानसर्वावयवा
जीवामि हन्त किं नत्मबलैः ?

बहवः किल सन्ति मठाधीशाः
जीवन्तो नाम जपन्तो मे
अलसाः सत्यपि बहुसामर्थ्ये
कुर्वे किमदृष्टे विपरीते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३७. संस्कृतभाषाऽष्टकम्

गङ्गेव भुवं परिपावयते
गौरवमहिता संस्कृतभाषा
लोकाभीष्टं संसाधयते
दिव्या वाणी संस्कृतभाषा । १

मधुरा ललिता हृद्या रम्या
कमनीयपदावलिसमुपेता
गौरवमर्थानां निवहन्ती
कल्याणमयी संस्कृतभाषा । २

प्राचीना या वसुधाप्रख्या
नित्यं नवनवमुद्भावयते
जगतां वाचां पोषणकर्त्री
अतिसमुदारा संस्कृतभाषा । ३

निगमागमगीतसुमहिमेयं
मान्यैर्मनीषिभिः सम्मान्या
सद्ग्रन्थधनैर्धनिनां धुर्या
चिन्तनपरमा संस्कृतभाषा । ४

नैराश्यमपाकुरुते चित्ताद्
दैन्यं दीनानां दारयते
भूतिं विजयं श्रियमपि दत्ते
सद्भावधना संस्कृतभाषा । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आचारविचारान् संस्कारान्
व्यवहारानपि भुवि निदिशन्ती
जनवर्गं सन्मार्गे नयते
प्रवराचार्या संस्कृतभाषा । ६

ऐक्यं या राष्ट्रे साधयते
जगदेकं नीडं ख्यापयते
विश्वे शान्तिं कामयमाना
जनमोदकरी संस्कृतभाषा । ७

भौतिकतायाः प्रबला दीप्तिः
मलिनयति न तत्कान्तिं कान्तां
गुरुतां स्वमहिम्ना रक्षन्ती
दीप्तात्मबला संस्कृतभाषा । ८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३८. संस्कृतं भूतले राजतां भ्राजताम्

१ या गिरा ज्ञानपीयूषसंवर्षिणी
मुक्तिमुक्तिप्रदा धर्मसंदर्शिनी
पौरुषप्रेरिणी दैन्यसंहारिणी
भव्यभावैर्भवे शान्तिविस्तारिणी
सर्वदा तत्प्रभा मानसे द्योतताम्
संस्कृतं भूतले राजतां भ्राजताम् ।

२ या प्रदत्ते जनेभ्यो नवां प्रेरणाम्
इष्टकामांश्च या सत्यशोधार्थिनां
ज्ञानविज्ञानशास्त्रैः समुद्भासते
याऽमरैर्मानवैः सर्वदोपास्यते
के न धन्या जगत्यां हि संसेव्य ताम्
संस्कृतं भूतले राजतां भ्राजताम् ।

३ सर्वभावप्रकाशे परं पण्डिता
शब्दमाधुर्यगाम्भीर्यसम्मण्डिता
सत्कथालापिनी गीतिकल्लोलिनी
काव्यसम्मोहिनी सज्जनामोदिनी
जीवनी विष्टपे याऽखिलानां गिराम्
संस्कृतं भूतले राजतां भ्राजताम् ।

४ यत्र देवस्य काव्यामृतं राजते
यत्र सारस्वतं वैभवं भ्राजते
सभ्यतासंस्कृतीनामियं जीवनी
विश्वसन्मङ्गला विज्ञसंतोषिणी
रक्षतेमां बुधाः कल्पवल्लीनिभाम्
संस्कृतं भूतले राजतां भ्राजताम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३९. सुरभारती

सुरभारती समुपास्यताम्

१ या विश्वमङ्गलकारिणी
या दुरितचयसंहारिणी
अ म रै रनारतवन्दिता
विद्वज्जनैरभिनन्दिता
या धर्मसंस्कृतिजीवनं
शान्त्याः परं संसाधनम्
या भुक्तिमुक्तिविधायिनी
श्रमहारिणी जयदायिनी
दुर्दैवतो विषमस्थिता
सुजनैरियं परिपाल्यताम् ।

२ वेदो हि यस्याः सन्निधिः
शास्त्राणि परमः शेवधिः
सत्काव्यसौरभवासिनी
या मधुरगीतोल्लासिनी
अनवद्यगद्यविराजिनी
नवनवकथाभिर्भ्राजिनी
अध्यात्मवैभवमण्डिता
विज्ञानचर्चापण्डिता
अक्षय्यपदकोषा बुधैः
यत्नादियं संरक्ष्यताम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३ अभिरामजीवनपद्धतिं
या दिशति लोके जीविनां
नैराश्यहरणे सक्षमा
दात्री च या सत्सम्पदां
दैन्यं निहत्य च जीवने
स्वाधीनभावविकासिनी
सङ्गीतमयपदगुम्फिता
रसर्चाचिता मृदुहासिनी
एषा कथं समुपेक्ष्यते ?
अ व धी य ता मवधीयताम् ।

४ परिषेव्य यां सुरभारतीं
लोके प्रयाता वन्द्यतां
नानाविधासु विचक्षणाः
कवयोऽग्रगाः प्रतिभाजुषाम्
मानवसमाजहितं सदा
सन्दिष्टमनया दीयते
नित्यं नरैर्जगतीतले
पीयूषमेतत् पीयते
वि श्वस्य वाचां जीवनी
सुरवागियं राराजताम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४०. संस्कृतं राराज्यतां विश्वेऽखिले

संस्कृतं राराज्यतां विश्वेऽखिले

१ संस्कृतं भूमण्डलस्य सुमण्डनं
संस्कृतं सकलभ्रमाणां खण्डनं
संस्कृतं जीवनविधीनां दर्शनं
संस्कृतं रसनिर्झरीणां वर्षणं
तद्रसाप्लुतधारया धन्या न के ?

२ इयममरवाणी त्रिबुधगणवन्दिता
विज्ञलोकैः सादरं ह्यभिनन्दिता
इयमपूर्वालोकतः प्रविभासिनी
स्मेरवदना चारुचर्चितहासिनी
बिभ्रती मोदं मनसि राराजते ।

३ काव्यरसधाराऽधरीकुरुतेऽमृतं
ज्ञानगङ्गा पावनीकुरुते भुवं
पाणिनीये यान्ति विज्ञा विस्मयं
कौटिलीयं गर्वितं कुरुते न कं
के प्रशस्तिपरा न भारतदर्शने ।

४ अत्र मृदुपदनूपुराणां झंकृतिः
कालभीमा रणभटानां हुंकृतिः
अत्र कलशिंजितसमानाऽलंकृतिः
सर्वकल्याणी सनातनसंस्कृतिः
त द्वि भू ते र्द र्श नैर्मुग्धाः परे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ दीनतां कुण्ठां निराशां या क्षणात्
दूरमपहरते जनानां मानसात्
दिशति दीप्तिमथो समुत्साहं नवं
संयुनक्त्यमरत्वभावनया जनं
भ्रान्तभूवलया इमां समुपासते ।

६ आततं तिमिरं जगत्याः खण्डयन्
नीतिमार्गान् स्वप्रकाशैर्मण्डयन्
वेदभानुर्भूतले प्रविभासते
धीरधिषणाः श्रद्धया तमुपासते
वंचितास्ते तत्करस्पृष्टा न ये ।

७ या निधत्ते कालिदासे गौरवं
बाण-भवभूत्योश्च सन्तनुते श्रवं
यन्महिम्ना भासकविताकामिनी
द्योतते घनडम्बरेष्विव दामिनी
के गुणस्तवने जगत्यामीशते ?

८ आदिकविवाण्येतया समलङ्कृता
एतया जयदेववाणी झंङ्कृता
जयति भुवि वैयासिकी वाणी शुभा
भाति शंकरभारती मधुमत्पदा
के जगन्नाथे न मुग्धा आसते ।

९ काव्यपटुभिः सृज्यते सर्वा विधा
भव्यमेवोद्भाव्यते विज्ञैः सदा
वाङ्मयं कुरुतेऽदसीयं विस्मयं
को न यायाद् विपुलसंपत्त्या स्मयं
गुणविदोऽस्याः मण्डले ग्रामे पुरे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१० उपकरोतीयं भृशं भाषाव्रजं
नवपदैरर्थैर्विचारैः सन्ततं
वाग्विदां परमा विचारं तन्वते
देववाणीं मूलभाषां मन्वते
विश्वरूपां भारतीं समुपास्महे ।

११ शब्दराशिमहोदधिं तर्तुं क्षमाः
विष्टपेऽस्मिन् सन्ति के बुधसत्तमाः
सर्वविधविज्ञानपथसंचारिणी
जयति सुरवाणी सुमंगलकारिणी
कल्पतामेषा जनानां सम्मुदे ।

१२ एकसूत्रे बध्यते लोकोऽनया
वीक्ष्यते मित्रस्य सर्वश्चक्षुषा
विश्वमेषा हृयेकनीडं मन्यते
एतया प्रेम्णो वितानं तन्यते
के न महिमानं जगुर्जगतीतले ।

१३ अवति याऽस्माकं पुरातनसंस्कृतिं
हसति याऽपदि धारयन्त्यमितां धृतिं
जगति तनुते योपकाराणां ततिं
भवति कः शक्तः प्रकर्तुं निष्कृतिं
देववाणीं तां समे वन्दामहे ।

१४ यत्नतो येऽवन्ति भव्यपरम्परां
कुर्वतेऽव्याजं च सुरवागर्चनां
भूषिता तैर्भारतीयवसुन्धरा
भाति नन्दनविपिनसच्छोभाधरा
यान्ति जनगणवन्द्यतां ते भूतले ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४१. कालिदासप्रशस्तिः

कविकुलकमलदिवाकर ! कविवर !
का लि दा स शतवन्दनम्
न वर स भ र भरिता सुरवाणी
कु रु ते भवदभिनन्दनम्

१ कुत आनीता सखे ! लेखनी
न च न व चि त्र विनिर्मात्री
जड़ं प्राणवन्तं प्रकुर्वती
वसुधां व्योम्ना संधात्री
मे घ वि दि त कान्तोदन्ता सा
यक्षी कुरुते वन्दनम्
कविकुल ...

२ त व क म नी य कल्पनावीणा-
मृ दु झं कृ ति झंकृतिगात्रा
चिरनिद्रितरघुवंश्या मूर्तिः
जा ग रि तो न्मी लि त नेत्रा
उपकृतेव सा सुकवे ! भवतो
भा ले ऽ र्प य ते चन्दनम्
कविकुल.....

३ या स न्दे श मिषेण भाविकान्
भ व्यां धनदपुरीमलकां
ग्राम-नगर-निर्झर-गिरि-सरितां
दर्शयते प्रकृतिं सुभगां

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संचरन्त्यसौ परितः कुरुते
दीपशिखा भवदर्चनम्

कविकुल.....

४ शुभ्रं चारु किरीटमनुपमं
यः किल भारतवर्षस्य
पुण्यसलिलसरितां धाराभिः
कुरुते परिक्रमणं ह्यस्य
देवतात्मशैलः स विधत्ते
कि न्न र गा नै स्ते स्तवनम्

कविकुल.....

५ विकचकुसुमसुकुमारमनोहर-
सौन्दर्यं वपुषो दधती
अभिनवोपमासमकमनीया
शकुन्तला मञ्जुलसृष्टिः
वि श्व नाट्यरंगेऽवतरन्ती
कुरुते कलमभिनन्दनम् ।

कविकुल.....

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४२. दयानन्दयतिवरो विजयते

दयानन्दयतिवरो विजयते

१ हित्वाऽखिलभौतिकसुखजातं
जननीवात्सल्यं प्रियतातं
वेत्तुं संसृतिचक्ररहस्यं
बाधानां सङ्घं विगणयते ।

२ देशं पराधीनमथ दलितं
जनवर्गं निर्धनताऽऽकुलितं
वीक्ष्य रिपूणां कुटिलं जालं
भीमरणे स्वं यो योजयते ।

३ निराकृत्य दृढ़मूला रूढ़ीः
प्रखरतर्कजालैः शास्त्रीयैः
दिशि दिशि जनचैतन्यमावहन्
भारताम्बरे भानुरुदयते ।

४ वेदालोकैस्तिमिरमुदस्यन्
जगति ततं पाषण्डमपास्यन्
एकेश्वरपूजां प्रचारयन्
सत्यपथं सर्वान् दर्शयते ।

५ भ्रमोच्छेदनार्थे सत्यार्थः
तेन जगत्यखिले प्रकाशितः
तत्परिशीलनहृतसन्देहः
कः कुपथे गन्तुं कामयते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६ नारीणां शिक्षा प्रचारिता
दीनेभ्यो हृदि दया धारिता
जनजागृतये ह्यार्यसमाजः
नित्यनूतनामुन्नतिमयते ।

७ आर्षी सन्ध्याहवनपद्धतिं
संघटनं जनसेवावृत्तिम्
अन्यायप्रतिरोधनकार्यं
दिशन् जनानार्यानुन्नयते ।

८ काचित्तेन न गणिता भीतिः
परिमुक्ता नो सत्या नीतिः
विषमपि पीत्वा सुधाप्रवर्षी
अद्भुतकर्म जगति धारयते ।

९ को गणयेदुपकृतीस्तदीया
या विदधेऽसौ परमदयालुः
तच्चरित्रमहिमाऽतिमहीयान्
क्षमाधनो निजहन्तरि दयते ।

१० आस्थावानीश्वरविश्वासी
राष्ट्रहितार्थेऽर्पितसर्वस्वः
मुदितमनाः स्वासून् योगीन्द्रः
लसतु विभोरिच्छेत्यर्पयते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४३. वित्ते विनिवेशय चित्तम्

अर्जय वित्तं चर्चय वित्तं
वित्तमिदं जगतीसारं
वित्तयानमारूढो मनुजः
प्रतरेद् भवपारावारम् । १

अर्थनिबन्धनमेतत् सर्वं
तदभावे सकलं व्यर्थम्
अर्थमुपेक्ष्य न कुर्या बन्धो !
किमपि जीवने त्वमनर्थम् । २

धनं विना प्रतिभायाः कुसुमं
याति न रुचिरं प्रविकासं
नाति भाति दुर्दिनपंकजवत्
प्रकटीकुर्वद् मधुहासम् । ३

पृच्छति कोऽपि न वार्तां गेहे
भार्या नालपति प्रेम्णा
परिचिनुते नो मित्रगणस्तं
पात्रीकृतो न यो लक्ष्म्या । ४

तावत् स्वजनस्तावन्मित्रं
तावत् ते श्रेयः प्रेयः
तावत् तावकमुच्छ्रितचित्तं
यावद् वित्तचयोऽमेयः । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रत्नराजिताः पण्यवीथयः
विश्वं विपुलार्थैः स्फीतं
कृशवित्तान् क्लिश्नाति केवलं
रसिकानिव विस्वरगीतम्। ६

ज्ञानमण्डिताः शास्त्रपण्डिता
अर्थद्वारि कृताञ्जलयः
किं तिष्ठन्ति न विनयविनम्राः
प्रो च्चा रि त म धु र स्तुतयः। ७

अद्य वच्मि तेऽहं भूतार्थं
परमशक्तिमति सति वित्ते
लीयन्तेऽखिलदोषाः पुंसाम्
अवधारय निपुणं चित्ते। ८

यावत् स्वस्थो यावच्छक्तो
विनियेशय वित्ते चित्तं
वित्ते सति नेदिष्ठदविष्ठा
एष्यन्ति प्रष्टुं वृत्तम्। ९

अर्थकृशं नरमेका सिद्धिः
स्वयं समभ्येति त्वरितं
पश्यति पटान्तरित इव सर्वान्
किन्तु वीक्षते कोऽपि न तम्। १०

संघर्षज्वालैरवलीढे
घोरेऽस्मिन् निष्ठुरविश्वे
मित्रं नान्यद् वित्तसमानं
भ्राम्यति सर्वं यद्वृत्ते। ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४४. नाणक-रणितम्

१ हे नाणक ! मदिरमधुरिमाञ्चित !
सु र न र दु र्ल भ गौरवमण्डित !
त्वं शक्तिमतां प्रथमो विदितः
महनीयानां धुरि परिगणितः
मूलं स क ल व्य व हाराणां
ध र्म्या णां लो का चा रा णां
मनुजानां जीवनगरिमा त्वं
शुभ्रा वासन्तिकसुषमा त्वं
त्वं मधु जीवनपथपाथेयं
त्वं लोकानां परमोपेयम् ।

२ दीप्तिस्त्वं तेजोदीप्तिमतां
ऊष्मा त्वं वैभवमयजगतां
त्वत्तः प्रतिभा प्रतिभानवतां
दीप्तो दर्पस्त्वं मानवतां
त्वं सौन्दर्यं निर्माणानां
लालित्यं कलानिधानानां
त्वत्तः सर्वं भुवनं भव्यं
सर्वं मदिरं सर्वं नव्यम् ।

३ त्वद् बिना जगति जीवेम कथं
जीवनवसनं च वयेम कथं
प्रतिपदमवलोक्या ते शक्तिः
शक्तिर्यस्मिंस्तस्मिन् भक्तिः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं मलिनमुखान्यवभासयसे
रुदतो बालानपि हासयसे
रूपं ते विश्वोन्मादकरं
क्वणितं मधु जगदाह्लादकरं
नवलीलाभिर्भरितं चरितं
कौतुकगृहमिव नववस्तुभृतम् ।

४ कश्चित्तवानुकम्पां लब्धुं
श्राम्यति नित्यं भ्रामं भ्रामं
कोऽप्यनलवर्षुके मध्याह्ने
चणकान् भृज्जत्यविवितयामम्
मन्त्राणां तन्त्राणां सिद्ध्या
कोऽप्यधिगन्तुं त्वां संयतते
निधिकामनया विपिनं प्रविशन्
किं किं नो कष्टकुलं सहते।

५ मुञ्चति कश्चन धनलाभधिया
प्रियजनपरिवृतमपि निजगेहं
विवशा दारिद्र्यपराभूता
ललना पण्यीकुरुते देहम्
तिष्ठति धनिनां गोपुरपुरतः
प्र ह री धनहेतुप्राणपणः
तव सौ न्द र्या व जि त चेताः
मुञ्चति नासून् कश्चित्कृपणः

६ रुष्टाः क्रूराः परुषाः पुरुषाः
क्वणितैस्ते मृदवो जायन्ते
प्रेयांसः कौटुम्बिकलोकाः
त्वत्कृपां बिना विमनायन्ते
केषां ननु पुण्यानां फलमिह
लब्धं भोस्त्वया विनायासं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तिष्ठसि यदक्षदण्डेन समः
विश्वं परिमति सविश्वासम्

७ दृष्टिक्षेपैस्ते प्रतिबुद्धाः
मन्ये भूगर्भगताः सुप्ताः
अट्टा गर्वप्रोन्नतशिरसः
कथमद्य विपश्य हसन्ति भुवः
य ज्ज ग दापणके रमणीयं
भव्यं चित्रं बहुकमनीयं
हे नाणक ! तव मदिरस्पर्शात्
परिणमति तदखिलं रसनीयं
वृणुते लक्ष्मीरूपेण च यं
प्रीतो जगतामीशो विष्णुः
कस्तस्य वदेद् विभवं मनुजः
युधि कश्चैतस्य भवेज्जिष्णुः ।

८ क्रयशक्तिस्तव लोके प्रथते
सर्वस्ते भुवि दास्यं भजते
ह्रेषितमश्वीयं गजरसितं
मुग्धानां वनितानां हसितं
नूपुररणितं ललितं भणितं
गीतं चाद्यं लास्यं क्वणितं
हावो भावो लीलाचलितं
गर्वो निष्टा दृष्टं वलितं
पाण्डित्यं प्रतिभानं विदुषां
बु द्धे र्नै पु ण्यं बुद्धिमतां
वीराणां दिग्विदितं शौर्यं
वधकाण्डे क्रूराणां क्रौर्यं
किं किं नो लोके क्रीणासि
केषां शान्तिं नो मुष्णासि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

९ त्वां जानेऽहं बहुरूपमयं
नि ज च रि तं मोहितजगतीकं
त्वं षड्यन्त्राणां सूत्रधरः
दक्षः प्रतारणे कलहपरः
आश्रित्य भवच्छायां सुखदां
क प ट ा ङ्कु रचयाः प्रवर्धन्ते
विकसन्त्यनिशं स्वार्थप्रकराः
त्व रि तं भवतन्वो जृम्भन्ते ।

१० पुनरपि जीवानां भर्ताऽसि
ना ना वि प दामपहर्ताऽसि
तिष्ठेस्त्वं भुवि यद्रूपोऽसि
उग्रोऽस्यथवा शमरूपोऽसि
स्तोतरि मयि कृपादृशं धेहि
सौम्यं वेषं मे परिधेहि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४५. आशासुन्दरी

त्वं प्रभातसुषमेव मनोज्ञा
रम्या त्वं श्वोनीकाशा
त्वयाऽभिरामाऽखिलवसुधेयं
का न रञ्जिता भात्याशा। १

आशे ! त्वं कं नो प्रेरयसे
प्रेषयसे वा कर्मपथे
त्वं दूरस्थितफलवत्कान्ता
स्फु र सि मीनवन्मुहुर्जले। २

घनतिमिरे दीपालिनिभा त्वं
आकर्षणमतुलं धत्से
नवमञ्जुलमङ्गलपरिधाना
मोदभरं त्वरितं तनुषे। ३

दैवविडम्बनतः परिखिन्नाः
कर्मसु परिश्रान्ताः क्लान्ताः
सुन्दरि ! तव रूपैः कमनीयैः
त रु णा य न्ते विक्रान्ताः। ४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चमो रागः

समयाचारः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४६. अयि राष्ट्रदेवते !

राष्ट्रदेवते ! त्वां प्रणमामि

१ त्वं कविवर्यैर्गीतचरित्रा
मङ्गलदात्री परमपवित्रा
त्वं विख्याता रत्नधरित्री
त्वं कल्याणकुलस्य सवित्री
गाङ्गैः सलिलैः क्षालितचरणा
त्वं करुणेश्वरि ! दीनोद्धरणा
महिमानं कथमिव गायामि ।

२ स्वीयकराब्जैस्त्वां भूषयते
प्रकृतिः फलकुसुमैरर्चयते
मौग्ध्यं ते सममावर्जयते
औदार्यं त्वामवतंसयते
देवि ! परं चित्ते ह्यवधारय
चारुतरं सर्वं न विचारय
पीडां निजमनसः कथयामि ।

३ रूपं ते दृष्ट्वा कमनीयं
परितो धनराशिं रमणीयं
लुब्धा रिपवो बहुकृतवेषाः
आत्मीया अथवा वैदेश्याः
बहुधा त्वामवमानितवन्तः
लुञ्चितवन्तो लुण्ठितवन्तः
स्मयमानां पुनरपि पश्यामि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ क्वचिदवलोके भाषाभेदं
साम्प्रदायिकं वा मतभेदं
भेदं जाति-प्रान्तगतं वा
विज्ञानां जनयन्तं खेदं
स्वार्थसमीरैः देशो भग्नः
कलहकुपंके गाढं मग्नः
अविचलभावामाकलयामि ।

५ दीनमनुजताविशसननिरता
शस्त्रमदाढ्या धनमददृप्ताः
क्रूरा दारुणकर्मणि मग्नाः
हन्त! तवाङ्गविखण्डनलग्नाः
विदधत्यत्याचारमशङ्काः
केचिन्मनुजत्वस्य कलङ्काः
तेष्वपि दयमानां पश्यामि ।

६ स्वाच्छन्द्यं परितोऽपि विलोके
सतो विषण्णानहमवलोके
मानवता लभते नो शरणं
कथं भवेद् हा विपदो हरणं
वारं वारं त्वां नयहीनैः
धूर्तैः स्वार्थपरैश्छलपीनैः
नेतृगणैर्मुषितां पश्यामि ।

७ शक्तिमती सद्गुणसमुपेता
विद्यावैभवचारुनिकेता
कथं प्रमादजमदिरां धयसे
कुटिलारातिषु भूयो दयसे
मा परिभवविषपानं कुर्याः
त्वां नमन्ति धरणीधरधुर्याः
दर्शय विक्रममाशंसामि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवि ! पुनस्तेजः संधारय
रणनीतिं बहुधा विस्तारय
जहि शत्रौ करुणाया दम्भं
कुरु जनमङ्गलकर्मारम्भं
जनजागरणं जगति विभातु
तमः समस्तं विलयं थातु
श्रियमवतीर्णां त्वयि पश्यामि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४७. तव जम्भे दध्मः

इतिहासगवाक्षादवलोके
मानवतेऽहं ते करुणकथाम्
अश्रुस्नातां रुधिरैः सिक्ताम्
आर्तस्वरवर्णैः परिरचिताम् १

त्वमरोदीर्धर्मधराऽपि यदा
जाता बान्धवशोणितशोणा
भारतयुद्धे सर्वेऽभूवन्
आहतकायाः क्षोण्याः कोणाः । २

जौहरदाहैःसम्प्रत्यपि ते
मानवते! मानसममितप्तं
स्वाधीनतार्थसंग्रामेषु
किं किं सुभगे ! तव नो लुप्तम् । ३

अवहन् शोणाः सरितः परितः
नयनानामविरलजलधाराः
कतिधा नामज्जत् तत्र जगत्
के नाव्यथन्त कृतचीत्काराः । ४

कोऽप्युन्मादः प्रकटीभूतो
भूयोभूयस्त्वां रोदयते
निजरुधिरपिपासाशमनार्थे
हिंसाताण्डवमायोजयते । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दानवबलसमुदयसमुपेता
तनया स्वार्थस्य युयुत्साऽऽख्या
विध्वंसकरी निर्माणानां
सहचरी कुटिलपथयानानाम् । ६

त्वं वदसि कथां के श्रोतारः?
श्रोतारो नाप्यवबोद्धारः
वृद्धिं यातीयं व्यथाकथा
भुवि भाति यथा किल बृहत्कथा । ७

वह्ने दग्धा भूयोभूयः
लोके प्रचारमुपयातीयं
गीता-रामायण-सप्तशती-
प्रख्या प्रपठ्यते चानुदिनम् । ८

बहुभिर्वाचकवृन्दैरनिशं
पठिताऽपि न गच्छत्यवसानं
श्रावं श्रावं पाठं पाठं
क्रन्दति करुणं हृदयं ग्लानम् । ९

हे सृष्टिविधातर्जगदीश्वर !
मानवताभाग्यलिपिर्भवता
दम्भोलिघटितया लेखन्या
मन्ये करुणामय्या लिखिता । १०

उन्मादो भाषाधर्मादिक-
कंचुकधारी किं नातनुते?
अम्भोवेगः सरितां कूलं
तद्वत् सीमानं भञ्जयते । ११

न स नीतिं कामपि जानीते
न च जानीते धर्माधर्मौ
पशुमारं जनमारणकार्ये
कः प्रतिवेशी को वा पितरौ ? १२

१२.१.

५ समयाचारः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गृहदाहो लुण्ठनमपहरणं
हिंसनमपि वा कुटिलाचरणं
एवंरूपोन्मादोऽपहसन्
विचरति परितो हि जगन्ति तुदन् । १३

मानवसङ्घे सहसाऽङ्गारान्
वर्षन्नातङ्कं प्रजनयते
अबलानामार्तविलापरवैः
स्वं पांसुलचरितं चर्चयते । १४

मानवतामानविघातकरान्
अपकारपरान् प्रसमीक्ष्य परान्
व्यथते भूयो ना सद्वृत्तः
करुणालहरीद्रावितचित्तः । १५

घोरे कर्मण्येवंरूपे
सक्तान् दर्शं दर्शं विभिमः
हे जगन्नियन्तः परमेश्वर !
एतांस्तवैव जम्भे दध्मः । १६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४८. पञ्चाम्बुधरा

हा ज्वलतीयं पञ्चाम्बुधरा

१ या पञ्चनदानां मधुसलिलैः
अन्तः सिक्ता पंचाम्बुधरा
वेदानां सूक्तसुधालसिता
शूराणां शौर्यकथाप्रथिता
हा दैव ! कृतं किं वद तस्याः
किमसौ नरशोणितपानपरा ।

२ किं लिखतु लेखनी कमनीया
द म्भो लीना मतिकठिनकथाः
पत्राक्षराणि बहु वेपन्ते
दुःखो च्छ् वा सै र्म लि नायन्ते
शुष्यति वाणी च मषी बहुधा
मूर्च्छति पतदङ्गारैर्वसुधा ।

३ शिशुजनलपितैर्मुखरं गेहं
कलकलस्तरुणगोष्ठीविचरः
क र्ष ण र तकृषकलोकगीतं
मंगलवाद्यानां कलस्वरः
सर्वं सहसा शान्तं मौनं
भीता च धरा प्रसरद्रुधिरा ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ प्रतिशब्दं हरं हरिं स्तौति
सा वाग् गुरुग्रन्थगता रौति
सशिरस्ताडं रोदिति ममता
क्रोशति मा मामिति मानवता
क्रन्दन - रोदन - विलपनपात्रं
नो दलति चलति दरमपि वसुधा ।

५ भ्रातृत्वं बन्धुत्वं हित्वा
भव्यां परम्परामपि भित्त्वा
स्वार्थान्धा दारुणकर्माणः
मन्दिरमर्यादां भिन्दानाः
स्वं पांसुलचरितं विलिखन्ति
के ते, परिचिनुते निर्दयता

६ अ ङ्ग रा णा म वि र लवर्षैः
ज्वलनां परितः समुपेतायाः
करुणार्द्रः किं कश्चिज्जलदः
शमयेदनलं झटिति क्षोण्याः
अथवा कुटिलाया राजनीति-
वेश्यायाः क्रीडेयं सहजा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४९. जिजीविषा

अयि जिजीविषे ! त्वया वितेने
कैषा लोके चित्रपटी ?
एतामवलोकयतो लभ्या
क्वापि न जीवनसरित्तटी । १

स्वप्नलोकललनाऽसि ललामा
त्वं जीवानां का नासि ?
मधुरा ललिता हृद्या रम्या
त्वं भुवि भव्यतमा भासि । २

जागर्षि त्वं निखिलजगत्यां
व्याप्नुवती जीवं जीवं
दीपशिखावज्ज्वलसि हृदन्तः
कं नो प्रेरयसे नित्यम् । ३

यथा नदीनां वेगा वेगैः
गन्तव्यं प्रति धावन्ति
तथा जनौघाः स्पर्धितुकामा
इव निजकर्मपथे यान्ति । ४

सृष्टेरारम्भान्निनादयन्
मन्त्रोद्घोषैः सर्वदिशः
वयं शतं जीवेम वत्सरान्
इति मधुरस्तव सन्देशः । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पदमखिलां प्रियकान्तामपि
बन्धुजनं स्वीयं हातुं
भवति तत्परो नरो न किन्तु
त्वां जिजीविषे! परितुम् । ६

रुजा परीतं व्रणविदूषितं
शस्त्राहतिभिर्विच्छायं
कंकालप्रतिमानं मोक्तुं
मनुजो नोत्सहते कायम् । ७

प्राणसंशयापन्ना लोका
विजहति सकलां मर्यादां
यथा तथा रक्षन्ति प्राणान्
श्रित्वा नीतिं नीतिविदाम् । ८

योगशास्त्रनिर्दिष्टाष्टाङ्गैः
दूरापोहितमृतिभीतिः
योगी परकायप्रवेशनात्
भूयो जीवति नवरीतिः । ९

प्राणानवितुं रुजोऽपहर्तुं
दिवानिशं यततेऽमन्दं
नवरसायनान्वेषणनिरतं
विज्ञं वैज्ञानिकवृन्दम् । १०

जीवो जीवस्याशनीयतां
याति यथा प्रकृतौ नित्यं
बलवानूनं तथा बाधते
जीवनाय लोकेऽविरतम् । ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धनिनामहं भवेयं धन्यः
प्रभुतावतामग्रगण्यः
सर्वे वशगाः सन्तु मानवाः
स्यामपि राज्ञां मूर्धन्यः। १२

विलसितमिदं त्वदीयं परितो
विश्वे विश्वस्मिन् भाति
मायावृत इव जीवसमूहः
तस्य वश्यतां परियाति। १३

एष तावके मनसि विहरते
अयि जिजीविषे ! यः कामः
नासावन्यसमुदयं सहते
भूत्वा पदे पदे वामः। १४

बीजमुप्यते संघर्षाणां
नूनं तदा मनःपटले
दुरुच्छेदतरुतामुपयाति
दृढ़मूलं सद् भूमितले। १५

एवमेधमाना जनमध्ये
स्पर्धा प्रसरत्पदाऽनिशम्
अनयपथं सद्यः प्रपद्यते
नाशितसुजनसमाजहितम्। १६

कपटपटीयांसो बलवन्तः
स्वार्थसाधनायां दक्षाः
परशोषणकार्येषु रमन्ते
निष्पादितनिजहितरक्षाः। १७

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सरलाः शुद्धात्मानो मनुजाः
कपटवागुरायां पतिताः
उत्साद्यन्ते परिभूयन्ते
धूर्तैर्दुर्जनगणैर्वृताः । १८

त्वं जिजीविषा भवसि जिगीषा
त्वं दुर्वृत्तानां नेत्री
नानारूपाण्याश्रयमाणा
नाट्ये निपुणा ह्यभिनेत्री । १९

चौर्यं तस्करता वधादिकं
सर्वविधं भ्रष्टाचरणं
प्रचरति विकसति सभ्यसमाजे
प्राप्य तावकं वरशरणम् । २०

पंके गौरिव भुवि मानवता
सीदति शीर्षं धुन्वाना
क्वापि हन्त शरणं नो लभते
व्यर्थमर्थनां कुर्वाणा । २१

राष्ट्राणां मध्ये जिजीविषे !
कां दुर्नीतिं नाश्रयसे ?
छलवेषं बहुधा कलयन्ती
कथय कदा कस्मिन् वयसे ? २२

त्वं क्षीणासि धनैर्जननिष्ठां
मिथः प्रभेदान् कारयसे
हिंसामपि तनुषे स्वलीलया
मुग्धान् जनान् प्रतारयसे । २३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परदेश्यं कपटाचारैस्त्वम्
इतिहासं संदूषयसे
धर्मं साहित्यं च संस्कृतिं
भ्र ष्ट वि धा नैर्धूनयसे । २४

परदेशान् स्वायत्तीकर्तुं
राष्ट्रे राष्ट्रे प्रतिस्पर्द्धा
तस्या मूलं त्वां जिजीविषे !
जगति वदन्ति प्रतिबुद्धाः । २५

विस्फूर्जद्वह्निप्रतिमानं
शस्त्रास्त्राणामागारं
संसूचयते हृदयमलिनतां
विश्वमनुजतासंहारम् । २६

जातीनां मध्ये विद्वेषः
पारस्परिकः संघर्षः
त्वत्तो जनिमानद्य समस्तं
वि त्रा स य ते ऽनलवर्षः । २७

जने जने क्षोभं प्रजनयते
वडवाग्निप्रतिमानोऽयं
शान्तिं निर्वासयते देशात्
तृणं प्रवातससानोऽयम् । २८

बमविस्फोटनधूममलिनतां
यदा यदा वियदुपयाति
अवघीरितधृतिबन्धा धरणी
तदा प्रकम्पं परियाति । २९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

युद्धोन्मादकथाभिः सकलः
परिपूर्णो जगदितिहासः
अरुणाभे तद्वर्णनिकाये
लसति तावकीनोल्लासः । १०

रक्ताक्ता मृत्स्ना श्रावयते
गाथां सैनिकवीराणां
बलिदानं चर्चयतेऽजस्रं
संख्यातीतनिरीहाणाम् । ११

परजीवनरसशोषणरसिके !
आत्मकेन्द्रिते कलहपरे !
मात्मगौरवात् स्वं विनिपातय
दयापरा भव दीननरे । १२

आत्मबलेन यदि त्वं जीव्याः
तदा कियत् स्याच्चारुतरम्
सुखभाजः स्युः समे समाजे
नास्तु किमप्युद्वेगकरम् । १३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५०. भारतीया नारी

१ आद्याऽहं शिशुशिक्षादात्री
वात्सल्यमयी जननी धात्री
अहमस्मि वधूस्तनया जाया
गेहेऽर्पितचित्ताऽर्पितकाया
अहमक्षदण्डतुल्या शश्वत्
परिचालयामि मानवसंघं
गे हा न्त र्वा देशान्तर्वा
निरुणध्मि हि मर्यादाभङ्गम् ।

२ क्वचिदस्मि यशोदा कौशल्या
मामा कुन्ती हिमवत्कन्या
सीताऽहं दुर्गा राधाऽहम्
अ प नीतभवाम्बुधिबाधाऽहम्
अनुसूया—द्रुपदसुता—विदुला
लक्ष्मी—पद्मिन्यथवा जीजा
अहमस्मि भामती त्यागमयी
श व री केवलमनुरागमयी
शा स्त्र ज्ञा काव्यरसज्ञाऽहं
रणशिरसि धनुर्वेदज्ञाऽहम्
दा न व दल ने विकरालाऽहं
मूर्त्ता दवदहनज्वालाऽहं ।

३ येषां मेधा प्रतिभा शौर्यं
साधननिष्ठा महदौदार्यं
विश्वं विस्मापयते सकलं
ज्योतिर्विकिरति भव्यं शबलं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामः कृष्णः पार्थो भीमः
रणविद्यायां धनिनोऽप्रतिमा
गौतम-कणाद-कपिल-व्यासा
भात्यखिलं यत्प्रतिभाभासा
ऋषयो मुनयः शूरा भक्ताः
तन्नाम्नां गणने के शक्ताः
उत्सङ्गे मम खेलितवन्तः
शिक्षितवन्तो वर्द्धितवन्तः ।

४ का दशा किन्तु हा मेऽद्यतनी
रोदिति गगनं रोदित्यवनी
मम जन्म धरापीठे पापं
कं कं न सहे भुवि सन्तापम् ।

५ मयि जातायां भवति स्तब्धा
मन्ये परिवारहृदयधमनी
नाहं रोदिमि भुवमवतीर्णा
सह मया प्ररोदिति मे जननी
धत्ते वदनं मलिनच्छायं
प्रेष्ठः समस्तपरिवारजनः
का कथा मंगलानां गेहे
सर्वो विलोक्यते ह्यवसन्नः ।

६ बाल्यादेव व्यवहारेऽहं
पि त्रो र्वि लो क ये भेददृशं
भोज्ये बसने शिक्षादौ वा
भ्राता मत्तो विन्दत्यधिकं
सेवासमर्पिताऽहं गेहे
इदमेव केवलं जानामि
श्र म का र्ये ष्वे कलमधिकारं
धृत्वा न पलं विश्राम्यामि
अतिथीनां गेहसदस्यानां
ज ल पा ना श नरचनाकार्ये

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यस्ता महानसे निजवयसो
बहुमूल्यमयं समयं गमये।

७ कथमप्यतिवाहितबाल्याऽहं
ता रु ण्य दे ह ली मा रूढा
कस्मै सुयोग्यपुंसे देया
पित्रोश्चित्ते चिन्ताऽऽरूढा
सुविचारितोऽपि मत्सम्बन्धः
कीदृग् भविता जाने नाहं
उन्मूल्याऽहं गेहोद्यानात्
कु त्रा रो प्ये दै वा धी नम्
धृत्वा शबलान् स्वप्नान् स्वान्ते
न व व धू रहं भर्तुर्गेहं
सालङ्कारा धृतसम्भारा
प्रविशामि विहाय पितुः स्नेहम्।

८ भर्ता पश्यति धनसंभारं
श्वश्रूरालोकयते स्वर्णं
पश्यामि हताशाऽहं मुकुरे
मम सौन्दर्यं रूपं वर्णम्
यातेऽनेहसि धनलोलुपता
कटुवचनानां रूपं धत्ते
पितरौ क्रुश्येते मम निःस्वौ
प्रतिवेशिवधूस्तवनं क्रियते
ताड्येऽहं व्यंग्यवचःप्रसरैः
ज्वलदनले जीवन्ती दह्ये
परिमुच्ये वा कुटिलाऽऽरोपैः
प्रतिपलविषमं समयं गमये।

९ स्मितमप्यधरेण मदीयेन
चिरतो विस्मृतमिति जानामि
तद् बालसुलभचापल्यं मे
चित्रार्पितमिव संपश्यामि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

१० अधिकाराणां रक्षार्थेऽहं
यं यं यत्नं मनसा विदधे
स्वार्थाभिमुखेन समाजेन
विधिभिर्भ्रष्टैर्मोधीक्रियते ।

११ पश्याम्यवलम्बनहीनाऽहं
जगतामीशं प्रभुमवलम्बम्
अथवा नैराश्यतमसि घोरे
निन्दामि मुहुर्निजहतदैवम् ।

१२ दोषेण इषये कं पुरुषं
नारी नारीभिर्मलीमसा
लोभोपहता मन्दा मूढा
मम दुर्गतिहेतुः सा सा सा ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५१. को नु विज्ञातुमर्हति

राजनीते ! चरित्रं ते को नु विज्ञातुमर्हति
सततं यत्र पात्यन्ते नानालक्ष्यभिदः शराः । १

क्व ते सागरगम्भीरमद्भुतं चरितं महत्
ऊर्मिभङ्गावलोकेऽपि भीरुः क्वाहं तटस्थितः । २

भूयो भूयोऽनुभूयाऽहं त्वच्चरित्रं विलक्षणं
चापलाय प्रवृत्तोऽस्मि देवि ! किंचिद्विवक्षया । ३

स्वयं प्रकोपमुद्भाव्य स्वयं स्वस्त्ययने रता
निपुणेव नटी नाट्ये श्रयसे नवभूमिकाम् । ४

कुटिलानां हि बन्धुस्त्वं त्वं निधानं परं स्मृता
त्वमङ्गसङ्गिनी तेषां सदा मोदविवर्धनी । ५

स्तुतिं निन्दां भयं प्रीतिं क्रूरतां मृदुतां तथा
धारयन्ती समं क्रोड़े साम्ययोगेऽसि संस्थिता । ६

राजनीत्यभिधानाऽपि राजस्वेव न राजसे
रथ्याजनोऽपि भक्तस्ते सर्वतो याति दृक्पथम् । ७

स्वार्थशस्यविकासाय कीर्त्यसे भूमिरुर्वरा
त्वामवाप्य न के लोके उल्लसन्ति लसन्ति च । ८

वीक्ष्य लोके प्रतिष्ठां ते जनाः सर्वार्थसाधनीम्
इदानीं सर्वकार्येषु श्रद्धया त्वामुपासते । ९

त्वदीयेन विशालेन गरिम्णा हृतचेतसः
आश्रितास्त्वां सदाचाराः साधवो यान्ति विक्रियाम् । १०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्मलेनाम्भसा पूर्णा बकव्रातैः परिवृता
संकुला सरसीव त्वं दुर्जनैर्बकवृत्तिभिः। ११

देवि ! नानास्वभावोऽयं लोको धात्रा विनिर्मितः
त्वामन्तरेण यद् ब्रूते शृणु मत्तो वरानने ! १२

रिपूयन्ते हि मित्राणि दुर्हृदो यान्ति मित्रताम्
कदा कुत्र कथं कीदृग् राजनीतौ न लक्ष्यते। १३

महान्तं राज्यसंभारं धर्तुं हर्तुं विपद्गणं
राजनीतिं विना कोऽन्यः क्षमतेऽत्र जगत्तले। १४

दमने चापि दुष्टानां दण्डने द्विषतामपि
रक्षणे च सतामेषा राजनीतिः प्रवर्तते। १५

किं नात्र घोष्यते किं च कर्म नात्र विधीयते
प्रवादानां प्रमादानां विवादानामियं स्थली। १६

अपव्यये तु वित्तानां साधनानां च नित्यशः
आक्रुष्टाऽपि न जात्वेषा क्रमते हि पदात्पदम्। १७

बहुवित्तागमा नित्यं मुक्तहस्ता धनव्यये
मृदुला परुषा चेयं नीतिर्वेशवधूरिव। १७

सद्वृत्तं नैव जानाति शीलं नो शीलयत्यपि
कृत्याकृत्यविवेकस्य चिन्ताया दूरवर्तिनी। १९

एषा संजातदिङ्मोहा जनताहितकर्मसु
तोषयत्यात्मभक्तांस्तु नित्यं वैश्रवणोपमा। २०

महान्तं राशिमाचित्य प्रजाभ्यः करसंज्ञितं
राजन्ते राजवत् तेन केऽपि सौभाग्यशालिनः। २१

सामदानाश्रया क्वापि दण्डभेदाश्रया क्वचित्
दर्शयन्ती विचित्राणि स्वरूपाणि विराजते। २२

स्वाभिमानधनाश्चैव जात्युद्धारचिकीर्षवः
दुःस्वप्नवत् स्मृता अस्या नूनं खेदाय भूयसे। २३

इयं क्रीडास्थली रम्या पाषण्डस्य स्मयस्य च
ईर्ष्याक्रोशभयानां च हिंसाया अनृतस्य च। २४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिंसया दूषितायाश्च कर्कशायाः स्वभावतः
अञ्चलं राजनीतेस्तु दीनशोणितरञ्जितम् । २५

संकटैः संकुलामेतां क्रूरकर्मविनिन्दितां
राजनीतिं न मुञ्चन्ति तद्रसाक्षिप्तचेतसः । २६

हितार्थं सर्वभूतानां लोके यस्याः समुद्भवः
राजनीतिरसौ जाता पापपंककलंकिता । २७

बिभ्रतीयं परीवर्तं राजनीतिः पदे पदे
अवर्ण्यरूपचारित्रा स्वमहिम्ना विराजते । २८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५२. कलिकौतुकम्

भद्र निभालय कलेः कौतुकं भवे विशाले ।
किन्तु न पत भोः पटो बटो ! विकटे भ्रमजाले ।।

१ परितो वित्तवतामिह चर्चा
लोके दम्भपराणामर्चा
रक्षापुरुषाणां तस्करता
उत्कोचादाने तत्परता
श्रमिकाणां निजकर्मविरामः
दुर्नीतानां शुभपरिणामः ।
पश्य सखेदं चरितमनल्पं जगति विशाले ।
किन्तु न पत भोः पटो बटो ! विकटे भ्रमजाले ।।

२ धर्मार्थे वित्तं संकलितं
किंवा प्राक्तनपुण्यं फलितम्
तेन कुटुम्बजना दीव्यन्ति
धर्मविजयघोषं कुर्वन्ति
अनितरसामान्या धनदृप्ताः
केषां नो मान्यास्ते भक्ताः ?
सकलमाकलय कला-कलापं कलौ कराले ।
किन्तु न पत भो पटो वटो! विकटे भ्रमजाले ।।

३ शोषणमत्र भवे दीनानां
मुग्धानां साधनहीनानां
कति न तमोविधुराः सीदन्ति
पटं जीवनीयं सीव्यन्ति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीदृगुत्सवः कश्च वसन्तः ?
ज ठर भरणचिन्तायामन्तः

अवधत्ते को वद शनकैर्वा स्वर उत्ताले ।
मा पत मा पत पटो बटो! विकटे भ्रमजाले ॥

४ का षा याम्बरभूषितदेहान्
भव्यभवनराजिषु कृतगेहान्
सम्पत्सक्तान् संन्यस्तान्
वैराग्यं दिशतः श्रीभक्तान्
युक्ति मुक्तिपथस्य कथयतः
भूयस्त्वं वन्दस्व विनयतः ।

जल्प नाल्पमपि यथा न भवतात् क्रिया कपाले ।
मा पत मा पत पटो बटो! विकटे भ्रमजाले ॥

५ कोऽपि मात्रयाऽल्पं तोलयते
खाद्ये कोऽपि मृदं मिश्रयते
मन्त्र- तन्त्र- सिद्धिप्रलोभनैः
कश्चित् कलुष-कर्म कारयते
दा र य ते ऽन्यो द्रव्यग्राहं
भ क्ति बलैरंहःपरिणाहम् ।

अघततिघटिते किं नो घटतेऽस्मिन् कलिकाले ।
किन्तु न पत भोः पटो बटो! विकटे भ्रमजाले ॥

६ सामिषखाद्यं मद्यं पेयं
संहतनृत्यं मदिरं गेयं
त स्क र वृ त्ती नामासङ्गः
नै ति क म र्या दानां भङ्गः
पाषण्डे दम्भे सम्प्रीतिः
प्रत्यग्रेयं जगतो रीतिः ।

द्रष्टुं चेन्नो क्षमसे तिष्ठ निलीय तमाले ।
किन्तु न पत भोः पटो बटो! विकटे भ्रमजाले ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७ न्यायः सीदति विभवैः क्रीतः
साधुर्धावति दुर्जनभीतः
चलति च निष्ठा काञ्चनकान्त्या
सुखकाम्या भवभोगे भ्रान्त्या
यत्र तत्र हिंसाया लास्यं
दम्भेन स्कारीकृतमास्यम्

गजगत्या चल चल सानन्दं पथि विकराले ।
किन्तु न पत भोः पटो बटो! विकटे भ्रमजाले ।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५३. पुरा यथा

१ किं रुदितैराक्रोशजल्पितैः
मा चिन्तां समया यायाः
आशंसे नो परिवर्तनमिह
संसारोऽयं पुरा यथा ।

२ शतं युगानामपि वा यातं
याता अथ युगनेतारः
क्रान्तिकारिणो बहवो याता
पुनरपि सर्वं पुरा यथा ।

३ देवदनुजमध्ये संघर्षः
यत्र तत्र नैके कलहाः
निर्दोषाणां दीनजनानां
विशसनकार्यं पुरा यथा ।

४ प्रेक्षस्वाद्य शकुनयो बहवः
क प ट द्यू त विजेतारः
मुकुटं दम्भाडम्बरशीर्षे
किं न राजते पुरा यथा ।

५ बहु दृष्टं हे सखे ! सखेदं
वनराज्यं विततं भाति
यस्य बलं तस्यैव जयश्रीः
सत्ता बलिनां पुरा यथा ।

६ उपदेष्टृणां वाचो मोघा
धीरवीरपुंसां यत्नाः
गजनिमीलितेनेवाभ्रृण्वन्
लोकः क्रमते पुरा यथा ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५४. किम्

१ तीव्रातपदग्धायां कृष्यां
बहुवृष्टैरपि जलदैः किं
प्राणसंशयापन्नरुजार्ते
अनासाद्यसुधयाऽपि च किम् ?

२ येन केन लक्ष्मीः समुपैतु
सदा तदाराधनपरमाः
बधिराणामस्यां वसतौ भोः
कोकिल ! मधुमयगानैः किम् ?

३ खलदलबलवद्वात्याचक्रैः
नाशितसकलजनावासे
आयोगैराश्वासनमधुभिः
शा का र्थं ध न दा नैः किम् ?

४ वञ्चन-शोषण-कुटिलाचरणैः
येन समस्तवयो नीतं
सोऽप्युपदेशझरीं स्यन्दयते
तादृशकौतुकिना नः किम् ?

५ जातिर्या विषमे समये किल
मोहमयीं मदिरां धयते
किं तस्याः कुशलत्वपृच्छया
रु दि तै र नु ता पैर्वा किम् ?

६ तिमिराच्छन्नरजन्यां बन्धो ।
यदा दुःशकं पदात्पदम्
अभिनन्द्योऽयं लघुदीपो नः
किं दिनमणिना शशिना किम् ?

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

षष्ठो रागः

व्यङ्ग्यविलासः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५५. सर्वं कुशलम्

पठितं पत्रं विदितं वृत्तं
त्वं कुशलीति मुदितं चित्तं
य त्पृष्टं देशसमाजगतं
तस्मादन्यत् सर्वं कुशलम् । १

नाभूदार्याणामाचरणे
प्राग्लब्धपदं भ्रष्टाचरणं
सम्प्रति सर्वत्राश्रयलाभात्
मन्ये तस्याप्यभवत् कुशलम् । २

समुपागतसंकटवेलायां
तत्कारणजातसमीक्षार्थे
उदरम्भरिणामायोगानां
देशे किल चिरकालात् कुशलम् । ३

स्वत्वं संस्कृतिमपि मद्देश्याम्
उज्जासयितुं कः किं कुरुते
इत्यादिविवेकविमूढ़ायां
जात्यां जातं रिपुदलकुशलम् । ४

उत्कोचानां निःसंकोचं
जनमध्ये यद् दानादानं
कठिनानामपि किल कार्याणां
तद्द्वारा संजातं कुशलम् । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिंसा लुण्ठनमत्याचरणं
वद कुत्र न विश्वस्मिन् विश्वे
इति नेतृजनाश्वासनमधुभिः
किंचित् किंचिन्मनसः कुशलम् । ६

भूयांसो वादा देशेऽस्मिन्
आतङ्कोऽप्येषामेकतमः
यद् भवति भवतु नो भेतव्यम्
अत्रापि भवेदविदितकुशलम् । ७

वाचो नेतृणां मननीया
रिपवः सौहार्दैर्जयनीया
आतङ्कानां निन्दैवाऽलं
शान्त्या प्राणत्यागे कुशलम् । ८

कस्मान्निर्दोषरुधिरशोणा
वसुधा, नैतद् भोः प्रष्टव्यं
दृष्टं पश्यामो द्रक्ष्यामः
जनताया आत्यन्तिककुशलम् । ९

कुशलानां नेतृजनानान्तु
धन-साधन-दलबलतः कुशलं
धन-जीवननाशभयादन्यत्
सर्वं सर्वेषां नः कुशलम् । १०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५६. उदयन् सविता

निर्वाचनसागरमुत्तीर्णे
प्रियनेतरि सति ते का चिन्ता ?
जनते ! परिहर ननु नैराश्यं
भूयाः सद्यः प्रीता मुदिता । १

तं भज भक्त्या तोषय शक्त्या
स्तवनं कुर्या अथ लिख काव्यं
तं नम तत्परिक्रमणं कुर्याः
कुरु कीर्त्यास्तस्य सुविस्तारम् २

स इदानीमुन्नतपदरोही
सम्पश्य, समे तं प्रणमन्ति
तस्याधिकारसीमा विपुला
तं श्रयमाणाः किल नन्दन्ति । ३

समयोऽयमभीष्टं संसाधय
मा प्रमदस्त्वं हे प्रियजनते !
दिष्ट्या कुशलाऽसि त्वं भद्रे !
स्तवने परिचरणे वा नमने । ४

अज्ञोऽयं पठितोऽपठितो वा
एतन्न विचारपथे नेयं
सर्वे भगवत्सृष्टौ तुल्या
इति भूयश्चित्ते ह्यवधेयम् । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैवादधिकारपदं लभते
कश्चिद् विशेषतो राजनये
अभिजन-विद्या-शिक्षाऽऽचरणैः
किं कार्यं तस्य कथय भद्रे ! ६

तत्कृपाक्रटाक्षाद् दैवहतं
परिणमति त्वरितं रमणीयं
यद् दुरवाप्यं यद् दुःसाध्यम्
उपनमति निमेषार्धात् सर्वम् । ७

इदमाकलय्य जनते ! जनि-तः
मन्ये स्तुतिकला त्वयाऽवाप्ता
स्वाधीनस्ते ह्यधिकारोऽयं
नायं परेण लब्धो भविता । ८

वाङ्निपुणा जनसेवानिरता
बहवः स्वयम्भुवो नेतारः
विचरन्ति सर्वतो भूवलये
प्रत्यूहगिरीणां जेतारः । ९

स्तुत्या नत्योपासनया वा
दिक्पाला इमे प्रसीदन्ति
भक्तानामभिवांछितसिद्ध्यै
कां मर्यादां नो क्रामन्ति । १०

कथयामि त्वां सुभगे ! भूयो
भक्त्या तेऽहं परमप्रीतः
अर्घ्यैः स्तवनैरहरहस्त्वया
सेव्यः केवलमुदयन् सविता । ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५७. गच्छति गन्त्री

१

केयं गन्त्री शनैः सरन्ती
जनसम्मर्दं क्वापि नयन्ती
गतिरस्या मन्दा प्रतिभाति
गच्छन्त्यप्यवरुद्धा भाति
दृष्ट्वेमां लोकाः प्रहसन्ति
किं किं ते किल नात्र वदन्ति ।

२

कथमेवं शृणु गतिरदसीया
गन्त्रीयं भो ! जनतन्त्रीया
छु-क्छुक्-छुक्-छुक् मधुरक्वाणं
पश्येमां यान्तीमभिरामम्
अलसमन्दगमनेयं भाति
वृद्धा दण्डसहाया याति ।

३

सम्प्रति पश्य विरतगमनेयं
कक्षाभ्यन्तरतो दृश्येयं
यामि मित्र ! कक्षान्तर्यामि
यद् यदत्र सर्वं पश्यामि
अपि दृष्टाः कक्षा अदसीयाः ?
शोच्या सन्त्यथवा रमणीयाः
विरम विरम सर्वं कथयामि
गन्त्रीतोऽहं बहिरायामि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४

गन्त्र्यां भूयान् जनसमवायः
उदरम्भरिरलसो वा प्रायः
अ ध ना धनवन्तस्तिष्ठन्ति
मूढा विद्वांसश्च लसन्ति
क्रूरान् कुटिलानपि पश्यामि
कांश्चित् खिन्नानाकलयामि
तेऽन्योन्यं वादेषु रमन्ते
शान्तिहेतवे कलहायन्ते ।

५

पुष्पितवाचो ननु केषांचित्
मधुरा रमणीया आभान्ति
स्मितवदनाः कमनीयरमण्यो
यथा क्वचिन्निकटे ह्यायान्ति ।

६

कक्षाः केचिद् बहुशोभाढ्या
राजवदासीना वित्ताढ्या
नानोद्योगरताः श्रीभक्ताः
प द वै भवमदमदिरासक्ताः
दीनेभ्यो वित्तं वितरन्ति
नि र्वा च नसिन्धुं प्रतरन्ति ।

७

कक्षा बहवस्तिमिरनिलीनाः
मलिनाः सुखसौविध्यविहीनाः
जनसमुदायास्तत्राऽऽसीनाः
निजसुखदुःखविचारे लीनाः
शी र्षं ते धुन्वन्त्यसहाया
बहु विलपन्ति च वितथोपायाः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

८

गन्त्री दैवकृपातश्चलति
महतां तपःफलैर्वा सरति
स्वच्छन्दं कुरुते च विरामं
क्रन्दतु निन्दतु लोकः कामम् ।

९

के चि द ग्रगाः पटुवक्तारः
बहुशो नययुद्धे जेतारः
शान्त्याः फलजातं निगदन्ति
मुग्धानेवं समुपदिशन्ति ।

१०

शृणुत धैर्यपूर्वं नो वचनं
कल्याणार्थे वः पटुरचनं
यद्यपि यात्रा दीर्घविताना
गन्त्री मन्दा भूरिविरामा
लक्ष्यमलक्ष्यमलं क्रुष्टेन
किं भो इतस्ततो दृष्टेन
किं त्वरितं गमनेन विधेयं
किं किंचित् कस्मैचित् देयम्
पटुवचनानां गोष्ठीमध्ये
रात्रिर्नेया दिनमपि नेयम्
ऋच्छतु गच्छत्वेषा गन्त्री
प्रार्थ्या शक्तिर्विघ्ननिहन्त्री
हरिभजनं वः श्रेयोदातृ
सकलानां विपदामपहातृ ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५८. वोटदेव ! नमस्तुभ्यम्

प्रिया बन्धवो मतदातारः
शरणं युष्मानायामि
पादाब्जे वो विनयसमेतः
स्वीयां प्रणतिं विदधामि ।

१

अस्या वसतेः कष्टकथामिः
वारं वारमहं दूये
अश्रुक्लिन्नमुखोऽप्यसहायः
कां सहायतां वः कुर्वे
पुनरपि सबलभावना भूयो
मनसि मदीये जागर्ति
या मनसो मे धृतिं समग्रां
प्र ब ल ज वै रा न्दोलयति
जल-विद्युत्-सुपथादिवंचितान्
युष्मान् यदा प्रपश्यामि ।

२

वसतिरियं युष्माकं सद्यः
सुखसौविध्यैः परिपूर्णा
भास्यत्यलकापुरी स मा ना
वि द्यु च्छ टा श ब ल वर्णा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

केन्द्रमियं वसतिर्वो भविता
संस्कृति- कला - कलापानां
शिक्षायाः ख्यातं निकेतनं
क्षेत्रं बृहदुद्योगानाम्
अहं कल्पनानेत्रैरस्या
विपुलवैभवं पश्यामि ।

३

जनसेवायां रुचिर्मदीया
किं किं कर्म न कारयते
नगरे कलहानां शमनार्थं
मामेवाग्रे सारयते
प्रतिद्वन्द्वी भाषणदाने मे
कश्चिद् विरलतया लभ्यः
अधिकाराणां रक्षार्थे वो
वृणुत वृणुत मां हे सभ्याः
आर्तैः स्वरैर्दीनमनुजानां
वदत कदा विश्राम्यामि ?

४

शृणुत सहृदया ! मतदातारः !
नि र्वा च न मे त न्नि क टे
अत्रभवद्भिः परिपाल्योऽहं
मतदानैः समये विकटे
जेष्याम्येतं विकटसंगरं
नूनं श्रीमत्सहयोगैः
नेष्याम्युच्चैः पदं समस्तं
देशं सततसमुद्योगैः
शिष्टतयाऽहं पंचवर्ष-
पूर्वं भद्रा ! नायास्यामि ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५९. हे चाटुकार !

हे चाटुकार ! तव चाटुकला
जगदखिलकलानां कमनीया
अगुणे गुणगणदर्शनदक्षा
भुवि कस्य नरस्य न रसनीया। १

तव सुधामधुरवचनं श्रुत्वा
दृष्ट्वा हृदयं रसभरभरितं
परुषोऽपि भवति कोमलकान्तः
धन्यस्त्वं धन्यं ते चरितम् । २

अस्या रसवत्तां गुणवत्तां
के नानुभवन्ति नरा नित्यं
मनुजा दनुजा पशुपक्षिगणा
आपद्यन्ते स्वत एव वशम् । ३

श्रुत्वा भर्तुः प्रियचाटुवचः
तुरगो गतिवेगं दर्शयते
उन्मदहस्ती मधुरालपितैः
स्वामिन आज्ञामनुपालयते । ४

जानीते नृणां सहस्रेषु
कश्चित् प्रयोगकौशलशिल्पं
अवधूय समग्रान् यात्यग्रे
सौख्यं मानं लभतेऽनल्पम् । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्ठावन्तो यत्नैरुग्रैः
विन्दन्ति न तादृशमहिमानं
उपहारैस्त्वं स्तुतिवचनानां
लभसेऽनायासं गरिमाणम् । ६

षष्ट्यधिककलासु कलामेतां
कथमिव विज्ञा विस्मृतवन्तः
कार्यारम्भे मङ्गलमिषतः
अथवैनां धुरि कीर्तितवन्तः । ७

तव सरसकलेयं चाटुकार !
मन्ये प्राक्तनपुण्यै प्राप्याः
पुनरपि विशिष्टयत्नैरस्या
अधिगन्तव्या काचिन्मात्रा । ८

गेहे समाजमध्ये देशे
सकलोद्योगानां समवाये
प्रचरेन्मधुमती कला क्षिप्रं
विद्या गुह्येव यथाऽऽम्नाये । ९

रसमयं जगद् भविता नूनं
लोकाः भवितारः समुदाराः
श्चोतन्ति यदा हे चाटुकार !
कर्णे कर्णे मधुनो धाराः । १०

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६०. एकः साक्षात्कारः

एतैः प्रमाणपत्रैरर्थोऽस्ति मे न कश्चित्
तव योग्यताङ्कने वा क्षमताऽपि मे न काचित्
दीनेऽतिशयदयालुः केवलमिदं वदामि
त्वं संस्तुतिं समानय तुभ्यं पदं ददामि । १

परिचययुगेऽस्मदीये किं विद्यया प्रकुर्मः
किं साधनाविधानैः ज्ञानेन किं विदध्मः
इदमेव बुद्धिमत्त्वं सकलं च नीतिमत्त्वं
वृत्त्यै प्रयत्य शीघ्रं यच्छेः प्रशस्तिपत्रम् । २

यातं युगं पुराणं विद्यासमादरोऽभूत्
नानाकलाविदां वा लोकेषु माननाऽभूत्
काकावली कदम्बे सम्प्रति मुदा लसन्ती
अश्नाति हंसभोज्यं कलकाकलीं लपन्ती । ३

तव संस्तुतिर्न काचित् संस्थाऽधिकारिणोऽस्ति
किं वा दलस्य नेत्रा ते बन्धुताऽपि नास्ति
पुनरपि समागतोऽसि वृत्तौ निषक्तदृष्टिः
दृष्टा क्वचिन्निरभ्राद् गगनाददभ्रवृष्टिः ? ४

कार्यं भवेन्महद् वा लघु वा भवेन्निकामं
महतां कृपाकटाक्षैः सिध्येद्विना विरामं
तद् यत्नमाश्रयेथा हित्वा निराशभावं
महतां प्रसादमाप्त्वा तारय निमग्ननावम् । ५

लोके त एव शिष्टाः कलभाषिणस्त एव
विद्यावतां धुरीणा नयशालिनस्त एव

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

येषां सहासनं वा सहभोजनं महद्भिः
सखिताऽधिकारिवर्गैः मैत्री च वित्तवद्भिः। ६

पठिता त्वया न गीता मननं तु नैव नीता
व्यर्थं त्वदीयवयसो वर्षावली व्यतीता
या पत्रपुष्पचर्चा यद् भावनं मिथो वा
अर्थस्त्वया न बुद्धः श्रेयः कथं श्रियो वा ? ७

अविरामयत्नततिभिर्दैवप्रसादने त्वं
हे भद्र ! चेदशक्तो मा दीनतां व्रजेस्त्वम्
अहमस्मि ते सहायश्चेतो न तेऽवसादय
मुद्रां ममेष्टदेवीमाराध्य मां प्रसादय। ८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६१. अयि देवि महार्घते !

कश्चिद् ग्रामे वसेत् कामं पुरे वा कानने वसेत्
धामभिस्तावकीनैः को देवि ! नो परिभूयते ? १

क्षणे क्षणे नवा भासि नवैर्वेषैः सुभूषिता
महार्घते ! किमद्यापि रमणीया न कथ्यसे ? २

उन्नतं पदमारूढ़ा राजसे त्वं महार्घते !
महतां दृष्टिपातेन गरिमाणं न के गताः ! ३

निःस्वानां मांसमेदोभिः प्रजाता त्वं वपुष्मती
धनेशानां प्रसादेन विलासान् शिक्षसे बहून् । ४

चिन्तानामाश्रयस्त्वं हि विकाराणां निकेतनं
पेषणी दीनधान्यानां तर्जनी मर्वतेजसाम् । ५

अनुभूयाऽपि शक्तिं ते सर्वतेजोऽभिभाविनीम्
अनले शलभायन्ते तवावज्ञापरा नराः । ६

वृद्धिमाये विलोक्य त्वं सुरसावत् प्रवर्धसे
रूपाणामेधमानानां देवि! नान्तो विलोक्यते । ७

वीक्ष्य रूपं करालं ते मांसशोणितघस्मरं
प्रजहाति भयोद्विग्नो धैर्यं धैर्यधनो जनः । ८

साहसं केचिदापद्य त्वया योद्धुमभीप्सवः
क्वचिदेव जयाशाभिर्द्योतन्ते धनमानिनः । ९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तावकीमुन्नतिं वीक्ष्य ये यत्किञ्चनवादिनः
असहिष्णूनुपेक्षस्व देवि ! तांस्त्वं कृपामयी । १०

किन्तु ये वित्तकोटीनां संख्याने परमालसाः
तत्र ते भ्रूविलासानां गतिर्नास्ति महार्धते ! ११

चित्रमेतद् धनाढ्यानामङ्कदुर्ललिता सती
अञ्चितैर्भ्रूविनिक्षेपैः रमसे निर्धनैः सह । १२

धनैर्जनैर्दिनैः स्वल्पैरद्य याता धनेशतां
त्वत्प्रतिष्ठां समीहन्ते निष्ठया भूतले न के ? १३

कामहं ते स्तुतिं कुर्यां रूपविस्तारविस्मितः
व्याप्य लोकं समस्तं त्वं स्वमहिम्ना विराजसे । १४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६२. को वेद किं वदानि

नेदं विचारितं प्राक्
मिथ्या समेऽवलम्बाः
किंचित्करा न सन्ति
लोके धनादिदम्भाः । १

आश्रित्य यानभूवं
दर्पेण ह्याध्मातः
उत्तुंगवीचिमाले
जलधौ निपात्य याताः । २

पुष्पाणि कण्टकानि
विश्वे समोद्भवानि
कस्यात्र किं नु लभ्यं
को वेद किं वदानि ? ३

दैवं सहायभूतम्
अभविष्यदत्र चेन्मे
व्योम्नो विचित्य तारा
हारं गले धरेयम् । ४

साधो ! किमत्र चिन्त्यं
सं सा र री तिरेषा
कश्चित् पिपासुरपरः
पी त्वा प्रमत्तवेषः । ५

जगतीचरित्रमुभयं
युगपद्विलोकयेऽहं
सहसा प्रगीतमधरं
शोकेन वेपमानम् । ६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सप्तमो रागः

प्रकीर्णपुष्पपरागः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६३. मनो मदीयम्

राजराजेश्वरसमानं राजमानं
विपुलवैभवराशिभिर्यद् भ्राजमानं
संचरणशीलं जगत्सु चराचरेषु
यद् विशति निःशङ्कमद्रिषु सागरेषु
भास्करादपि दीप्तिमत् तेजो यदीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम् । १

गतिमतां विश्वेऽस्ति तत् परमं जवीयः
शक्तिमत्सु न तत्समं किंचिद् बलीयः
व्रजति धूलिलवोऽपि गिरितां यद्गरिम्णा
यान्ति दीना वन्द्यतां भुवि यन्महिम्ना
बुधजनाः प्रवदन्त्यमितबलमेतदीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम् । २

इदमहो यात्रोत्सुकं भूत्वा कदाचित्
श्यामवर्णमनोहरं किल मेघयानं
यात्यधिष्ठायाऽलकां नगरीं प्रपश्यत्
चारुनगर-ग्राम-गिरि- सरितां वितानं
मंजुलं मृदुलं च चेष्टितमेतदीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम् । ३

भृगुपतेः परशोरिदं तैक्ष्ण्यं बिभर्ति
कल्पतरुकल्पं सकलकामान् पिपर्ति
दुःखदूनेषु क्वचित् कारुण्यवर्षि
तीर्थपंडावत् क्वचिद् दैन्यप्रदर्शि
क्वचिदिदं बुद्धस्य शान्तमहोऽद्वितीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम् । ४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चाटुकारवचःप्रसारैः फुल्लकमलं
भवति परनिन्दासु सरसं चापि तरलं
हसति नटवरचेस्टितं धौर्त्ये प्रकामं
शोभराजं वंचकत्वे वाऽसमानं
अद्भुतं भुवि कल्पनावित्तं यदीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम्। ५

भुवनविदितममुष्य चांचल्यं मनोज्ञं
चपलकपितुल्यं प्रधावत्येकतोऽन्यं
साधनामार्गैरसंख्यातैरसंख्या
आत्मवशयत्नेऽस्य जायन्ते विलक्षाः
विस्मिताः पश्यन्ति कौतुकमेतदीयं
सर्वदुर्धर्षं चकास्ति मनोमदीयम्। ६

कापथं भजते रमण्या रागरक्तं
चरति दुश्चरितं क्वचिद्धनलोभसक्तं
कोपवशपतितं विमुञ्चति सद्विवेकं
मोहतो विदधात्यसत्यस्याभिषेकं
नैकरूपविभास्वरं चरितं यदीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम्। ७

लोकविदितपराक्रमं गाण्डीवधरणं
पार्थमपि सहसा विधत्ते दैन्यशरणं
कंचिदुत्साहैरपूर्वैः सम्पृणाति
मारुतिर्जलधेर्मुदा पारं प्रयाति
सकलकामदुघं महत्तत्त्वं यदीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम्। ८

जडमिदं चैतन्यवत् कार्यं करोति
विश्वचक्रमिदं मुदा गतिमत् करोति
संशयं प्रतिपद्य सन्तनुते विनाशं
आस्थया कुरुते दर्षदि देवप्रकाशं
क्रान्ति-शान्ति विधायकं वर्चोऽदसीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम्। ९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मसाक्षितया जगति विलसद्वितानं
कुर्वदेव सदा किमपि वेविद्यमानं
स्वप्नलोके चित्रततिमिव सन्तनोति
दृश्यजातैरद्भुतं प्रकटीकरोति
नवनवाविष्करणसामर्थ्यं यदीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम् । १०

मन इदं सिद्धेर्महाद्वारं विभाति
प्राप्य शिवसंकल्पमतिशक्तिं दधाति
नानवाप्य नरोऽस्य योगं याति सिद्धिं
नेह लभतेऽमुत्र वा श्रेयःसमृद्धिं
सख्यमस्य न कस्य यत्नादेषणीयं
सर्वदुर्धर्षं चकास्ति मनो मदीयम् । ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६४. मुग्धं शैशवम्

बाल्यमाकारये नैति मां तत्पुनः
हन्त मोघा प्रजाता मदीयार्थना
नास्मि रुष्टः क्वचिन्नोद्विजे वाऽप्यहं
बाल्यतो मित्र ! जानामि तच्चापलम् । १

नीरमध्ये चलन्मीनवन्मानसे
क्षोभमुत्पादयन्ती तदीया स्मृतिः
मां क्षणं कल्पनासुन्दरे बिष्टपे
प्रापयन्ती विधत्ते न किं कौतुकम् । २

मुक्तहास्यं च तत् तच्च भूलोठनम्
तद्गतं धावितं तच्च मन्दस्मितं
निश्छलं मानसं व्योमगा कल्पना
मुग्धभावः परः पण्यवस्त्वर्थना । ३

आकुला मूर्धजा आननं मोहनं
तत्परीलोकयात्रोत्सुकं मानसम्
आग्रहोऽसौ च निर्हेतुकं रोदनं
सा च निश्चिन्तता रोषणं व्याहृतम् । ४

नापि रागः क्वचिद् द्वेषणं चापि नो
यत्र रोषः क्षणं तत्र मैत्री पुनः
सा कथायां रुचिः सा स्खलत्प्रस्तुतिः
राजमाना च सा चेष्टिते चारुता । ५

निष्ठुरे व्याकुले चिन्तया जर्जरे
जीवने सर्वमेतत् कुतो हन्त नः
मामकं वैभवं तस्य विश्राणितम्
आनयेद् यो गतं शैशवं मे पुनः । ६

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६५. प्रेयसि

१

प्रेयसि ! चारुदृगंचलशोभिनि !
दृष्टिपथं परियासि यदा त्वं
कति न तदाऽवतरन्ति नमस्तः
इन्द्रधनूंषि सपदि मम नयनम् ।

२

अवधीरितमाध्वीकमिदं ते
माधुर्यं वचसामनवद्यं
मामानन्दमये किल लोके
प्रापयते कान्ते ! यत्सत्यम् ।

३

प्राभातिकसुषमामवलोके
स्मितवदने ! तव मधुरिमहासे
लीलाञ्चितगतिमथ संपश्यन्
जाने नाहं कुत्राध्यासे ।

४

हे ललिताङ्गि ! यदाऽस्मि कदाचित्
त व सौ न्द र्य सु धारसमग्नः
त्वां परितोऽपि विलोके चकितः
तव नवकौतुकतरलितनयनः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

५

एषि च नैषि च रुप्यासि तुष्यसि
ध्यायसि गायसि नन्दसि कुप्यसि
प्रेयसि ! खेलसि त्वं नु मयैवं
कुर्वाणेदं तिष्ठ सदैवम् ।

६

तव कपोलपाल्यामलके वा
अधरदले दशने तिलके वा
पक्ष्मलनयनाब्जे संरुद्धः
कस्त्वां सर्वां द्रष्टुं शक्तः ? ।

७

कान्त्यजिरे तव हे वरवर्णिनि !
नित्यमिदं रमतां मम चित्तम्
मधुरसनिन्दिनि तव मधुवचने
लभतामुज्ज्वलरसरसिकत्वम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६६. धरा मे तदाऽस्ति रमणीया

धरा मे तदाऽस्ति रमणीया

आबध्नाति यदा लोकानिह
ऐक्यभावना महिता
आप्लावयति प्रेम्णो लहरी
मोदमङ्गलैः सहिता
दिनं सुमधुरं निशा विकसिता
दिशा च कमनीया। १

समये वर्षत्यम्बुदमाला
शस्यश्यामला धरणी
कृषकसमाजस्तालं दत्ते
गायति मुदिता तरुणी
गावो गां पयसा स्नपयन्त्यो
गृहेषु नयनीया। २

शुक्लपक्षशशिकलासमानाः
कला विकासमियन्ति
धनधान्यैः सम्भरिता गेहा
सुरनगरीं विहसन्ति
राष्ट्रार्पितजीवनविभवानां
प्रथाऽनुसरणीया। ३

सौराज्येन रंजितं चित्तं
यत्र न भजते भीति
नित्यं प्रगतिपथं प्रति गच्छन्
नरः श्रयति सन्नीतिम्
आततायिनां कुटिलयोजना
सदा विफलनीया। ४

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिमोद्भासित-कलासमर्चक-
विदुषां यत्र सुमानः
दम्भपूजया यत्र मानवो
भवति नितान्तं ग्लानः
यत्र तत्र सद्भावमण्डना
नी ति र्भ ज नी या । ५

क्वचिदपि विश्वविनिर्मलगगने
यु द्ध घ टा नो दे ति
दारुणशस्त्राहतमानवता
करुणदशां नोपैति
ऋद्धिमती सुखदा कल्याणी
शा न्ति रे ष णी या । ६

यत्र जायते जातु न लोके
कस्यापि श्रमहरणम्
आतङ्कैः कम्पितमानवता
याति न यं कं शरणं
समुचितनीतिपथं कलयद्भिः
विपदः शमनीया । ७

विश्वबन्धुतासन्देशं या
सन्ततमत्र ददाति
जीवमात्रकल्याणहेतवे
दिशं दिशन्ती भाति
गृहे गृहे सा संस्कृतवाणी
यदा सुपठनीया । ८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६७. ते हि नो दिवसा गताः

ते हि नो दिवसा गताः
रुष्टबन्धुसमा न जाने
कुत्र कां नु दिशं श्रिताः

१ काञ्चनी धरणियंदाऽऽसीद्
गगनमासीद् राजतम्
उत्सवोल्लासितगृहाणाम्
आ र वै वि भ्रा जि तम्
वैभवं क्रीडारतं
ग्रामे नगर्यां मण्डले
खेलति स्म विभा नृणां
वदने यथा ह्याखण्डले
स्वप्नवत् सर्वं गतं
भव्याश्च ताश्छवयो गताः
ते हि नो दिवसा घताः

२ भारतं विद्यातपोभिः
स त्क ला भि र्भ्राजितम्
अर्जने मनुनोदितानां
गुणगणानां व्यापृतम्
आ त्म सा ध न त त्प रं
भौतिकसमृद्ध्यै निःस्पृहं
सर्वमानवजातिगुरु ता-
गौरवं बिभ्रच्चिरं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजते स्म दिवाकर
प्रतिमं महीवलये यदा
ते हि नो दिवसा गताः

३ त्यागभावः क्वाधुनाऽसौ
यत्र जनकादेशतः
राज्यनमपि तनयो विमुञ्चितः
विनयवांश्चा रु स्मि तः
अद्य संघर्षो महान्
सम्बन्धिनां सम्पत्तये
तन्यते छलनाटकं
विधिवक्तृभिर्न्यायालये
दुरितदर्शनविकलकरणै-
रुच्यते सद्भिस्तदा
ते हि नो दिवसा गताः

४ गो ध नैर्धनितामयासीद्
भा र ती य व सु न्ध रा
दुग्धदधिनवनीततक्रैः
सम्भृताः सर्वे गृहाः
अद्य तस्मिन् भारते
जातं हि सर्वं दुर्लभं
पोषणेन बिना विरौति
क्षीणकायं शैशवम्
मूल्यवृद्ध्या पीडिताः
के नो वदन्त्येतत् तदा
ते हि नो दिवसा गताः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६८. कथमास्ते मे प्रियदेशः

कथय कथय रे मित्र कथय रे
कथमास्ते मे प्रियदेशः ।

वान्ति किमत्र पुरेव निगद मे
मधुगन्धा मदिरा वाताः
चान्द्रीज्योत्स्नाविशदरजन्यो
दिवसा अरुणविभाभाताः
किं निर्झरकलनादसुरम्यो
हिमवत्पावनपरिवेषः । १

आवसथेषु किमद्य सुलभ्या
आतिथेयपरमा लोका
ऋजुहृदयाः सन्तोषद्रविणा
धैर्यविनिर्जितभीशोकाः
दधनि पयसि तक्रे नवनीते
किं रागोऽसौ सविशेषः । २

ग्रामचत्वरेष्वायोज्यन्ते
किं रसपेशलसंगोष्ठ्यः
नाट्यगीतिभी रञ्जयन्ति किं
लोकं कुशीलवाः कुशलाः
तरलीकुरुते पुत्तलिकानां
नृत्यं संवादो वेषः ? ३

वरीवृत्यते किं जनमध्ये
प्रेममयं तत् सौभ्रात्रं
दीननिर्धना असहायाः किं
सन्ति राज्य-करुणापात्रं

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकरञ्जनं प्रविधत्ते किं
शासकवर्गस्यादेशः। ४

किं स्वातन्त्र्यभावना विलसति
विपुलतरे जनसमुदाये
प्रसरति किं शिक्षाया दीप्तिः
वृद्धिरेति नितरामाये
जनकल्याणमयोद्योगानां
यत्र तत्र किं सुनिवेशः? ५

नेतारः किं भरतदेशजा
भारतभूमेर्वरिवस्याम्
आद्यं मन्यन्ते कर्तव्यं
निदधाना भक्तिं परमां
किं तैर्लोकाभ्युदयविधेये
समनुभूयते सुखलेशाः? ६

भाषाणामाद्या मधुरा सा
दिव्या ललिता गैर्वाणी
शास्ति हृत्सु राज्ञीव दयालुः
भूत्वा जनताया वाणी
गुञ्जति वीणाझंकृतिकल्पः
किं तत्प्रेम्णः सन्देशः? ७

तीर्थे विप्रे देवमन्दिरे
किं सा श्रद्धा पूर्वतनी
लसति तपोभिः सद्विद्याभिः
किं मेऽध्यात्मधना ह्यवनी
मैत्र्या मुदितायाः करुणायाः
क्वचिद् दृश्यते परिवेषः? ८

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रुत्वा मे वचनं वद वद रे
जातं किं वदनं मलिनं
घोरहिमर्तौ करकापाताद्
यथा हृतश्रीकं नलिनं
सर्वं गतं विपर्यासं हा
अनुमिनोमि यस्ते क्लेशः। ९

स्वार्थतमिस्रायां घोरायां
किमपि न मित्र ! भवेन्मित्रं
नैतिकमूल्यानाभबपाते
सीदति सर्वः किं चित्रं
द्वेष-दम्भ-हिंसा-मद-धौर्त्यैः
ध्रियते जगति न को वेषः ? १०

अयि वयस्य ! मा कृथा विषादे
सद्भावायतनं हृदयं
नैशं तिमिरमुदस्यन् सकलं
भास्वानुपयास्यत्युदयं
निखिजलगच्चक्रैकनायको
वितरतु सुमतिं परमेशः । ११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६९. संस्कृतिगङ्गा

तरलतरङ्गा संस्कृतिगङ्गा
भाति पुनानाऽखिलविश्वम्

१ अविदितकालादुन्नतभालाद्
उद्भूता या निगमाद्रेः
शान्तिसुधां प्रेम्णा पाययते
जनसमुदायानातृप्तेः
सर्वमङ्गलं मञ्जुलरूपं
यस्या लोके परिदृश्यम् ।

२ सर्वमिदं ब्रह्मेति चिन्तनं
प्रेरयते समदर्शित्वं
प्रेमवितानं तनुते सृष्टौ
निराकृत्य किल भेददृशम्
अज्ञे दीनजने कारुण्यं
विस्तारयते या त्वरितम् ।

३ धर्मरागिणी पापशंकिनी
आस्थां धत्ते कर्मफले
वर्णाश्रमसंस्थामनुमनुते
विश्यस्ता सन्नीतिबले
यज्ञदानतपसां प्रवर्तिनी
प्रेरयमाणा पुरुषार्थम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ स्वानि परेषां परभूमीर्वा
दुर्भावनया ह्यात्मवशे
कर्तुमीहते नैव कदाचित्
बलं प्रयुङ्क्ते नापि कृशे
सर्वे मोदन्तां सम्मनसो
भूमाविति यत्सन्दिष्टम् ।

५ भिन्नविचारलहर्यः सततं
यत्रैकत्र समायान्ति
माधुर्यं संसृज्य समन्ताद्
इन्द्रधनुर्भुवि निर्मान्ति
संघटनं तत् परिवारीयं
कुत्रान्यत्र नु परिमृग्यम् ।

६ प्रेमरसैकभरं दाम्पत्यं
ह्यात्मयुगलमिलनं पुण्यम्
अत्र हृदयविश्रामोऽपूर्वः
साधनपथसहयायित्वं
ब्रुवते जातु न सन्तो हीदं
कामकौतुकस्यायतनम ।

७ अनासक्तिभावो विराजते
परहितकर्मणि यज्ञमये
भाति जीवनं रतं प्रवचने
स्वाध्याये वा धर्ममये
भौतिकधनजातादतिशेते
यत्र जगत्यध्यात्मधनम् !

८ प्रोद्भावयते या वीरानपि
रणविद्याकौशलदक्षान्
दण्डितदण्ड्यान् निजपराक्रमैः
कृपया कृतनिर्बलरक्षान्
रावण-कंस-जरासन्धानां
के न विदुर्यद् यद् वृत्तम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

९ उत्सङ्गेऽस्या वर्द्धितवन्तः
मुनयो मान्या योगिजनाः
भक्ताः शक्ता अतिसमुदारा
ब्रह्मतत्त्वचिन्तनपरमाः
काव्यज्ञैः विज्ञानपण्डितैः
भूषितमेतद् धरातलम् ।

१० संस्कृतिरेषा भरतभूमिजा
सुधापायिनी सुधामयी
विश्वमेकनीडं सम्मनुते
सकलधरापरिवारमयी
सर्वासां चिन्तनधाराणां
प्राच्यं भवति परिष्करणम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७०. यामि कमधुना शरणम्

देवगिराऽहं दैन्यमुपेता
यामि कमधुना शरणम्

१ गतं कुत्र तन्मे वर्चस्वं
यल्लोके महनीयं
कुत्र विलीनं सौरममपि मे
य ज्ज न ग ण क मनीयं
हन्त लुप्यते वैभवमतुलं
ब हु य त्नै र व नी यं
ह्रसति मामकं तपोऽपि
घृत्वा यद् धन्या धरणीयं
शून्याः प्रविलोके सकलाऽऽशाः
कथं भवेद् भयहरणम्

२ रुचिर्विलुप्ता स्वाध्यायादपि
कः पठिता खलु वेदान्
अनभ्यस्तशास्त्रो हि वेद किं
सू क्ष्म र ह स्य विभेदान्
अर्थोपार्जनसक्ताः सर्वे
सु ख म य जी व न कामाः
पुष्पितवचःप्रताने कुशलाः
श्रमतो ह्युद्विजमानाः
सीदाम्यपचित सकलावयवा
किं तिलकं वाऽऽभरणम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

३ यामि कदाचिद् भुवने सकले
भ्रमणे मतिं दधाना
तत्र विलोकेऽहं निजपुत्रीः
वेषं नवं वसानाः
प्रीतिपेशलं ताभिरपूर्वे
वार्ताक्रमे विशाले
व्यतियान्तं समयं नो जाने
न व न व च र्चा मा ले
ईहेऽहं भवतादीदृशमिह
विश्वे वातावरणम् ।

४ विस्मरामि कथमिव निजभक्तान्
प र्ण कु टी र नि वासान्
अवधूयाऽखिलजगतः सौख्यं
द त्त ज्ञा न वि भा सा न्
चिरं रक्षितो यैर्बहुयत्नैः
मा म क नि धि र्म ही यान्
त्यागं तेषां स्मारं स्मारं
रोमाञ्चो मे भूयान्
तस्याः परम्पराया भूयः
कथं भवेदवतरणम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७१. बाणभारती जयति

श्रीबाणभट्टकवेर्जयति रसभावभरिता भारती

१ या कल्पनापक्षतितती-
रारुह्य दिग्भ्रमणे रता
या निरवकाशाकाशतल-
विहरणमनाः परमोत्सुका
सार्धं क्वचित्तारासखीभिः
संलपन्ती राजते
दिवसावसानो द्वि ग्न या
सह सन्ध्यया वा भाषते
क्षितिरपि सुधाकरकरनिकर-
धौताऽस्ति यस्याः सुप्रिया
अरुणोदयास्तम न प्र भूः
संरोचते रागच्छटा
मुनिजनतपोवनवासिनी
शान्तिस्तु तत्सुखदायिनी
विन्ध्याटवीदुर्गस्थलीष्वपि
सा न खेदबिगाहिनी
किं किं न तस्यै रोचते
क्व न याति सा सोत्का सती ।

२ अनवद्यगद्यमहार्हशय्यायां
स्थिता कविभारती
दृश्याङ्कने धृततूलिका
प्रविलोक्यते निरता सती

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विस्तृतपटी तस्याः पुरस्तात्
प्र कृ ति सौन्दर्याञ्चिता
वै वि ध्य मयजनजीवनं
वेविद्यते तस्याः पुरः
अन्तःप्रवेशपरा च दृक्
तस्या न किं प्रविलोकते
संप्राप्य मदिरस्पर्श-
मदसीयं न किं विद्योतते
राज्ञः सभा पर्णोटजं
ग्रीष्मातपैस्तप्तं व नं
निर्झर-सरित्-पर्वत-घनोदय-
मे घ मा ला ब र्ष ण म्
आलोक-तिमिराच्छन्नता-
संश्लिष्टचित्रं बिभ्रती ।

३ प्राप्ते प्रसङ्गे भूयसीरालपति
पौ रा णि क क था:
शास्त्रीयतत्त्वं भाषते
लभते च सा समयं यदा
नवभाव-रस-गुण- रीति-
रम्याऽलङ्कृता सा भारती
चित्रोपमैर्ननु चित्रणैः
संभूषिता प्रतिभावती
आश्लिष्यति श्लेषं क्वचिद्
रूपयति कञ्चिद् रूपकैः
उत्प्रेक्षया परिसंख्ययाऽनुप्रास-
य म कै र्दी प कैः
समलङ्कृतेयं भाविनी
भुवने भ्रमन्ती भ्राजते
सौन्दर्यसुधया स्नात इव
लोकोऽखिलो राराजते
अद्यापि तच्चर्चापरा
रसिकावली विस्मयवती ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४

सा मृदुपदा विकटेऽपि
बन्धे भारती धत्ते मुदं
सा दीर्घदीर्घतरैः समस्त-
षदैर्न दूनोति क्षणं
प्राप्ते प्रसङ्गे कोमले
स्यन्दयति मृदुवाक्यावलिं
दधती यथा कण्ठे कले
स्वच्छां ललितमुक्तावलिं
ध्वनिसाम्यमप्यवलोक्यतेऽवसरे
पदानां तादृशं
रसितं क्वचिद् रणितं क्वचिद्
क्वणितं च शिञ्जितवादितम्
समलङ्कृतौ परिधानके
नित्यं नवा शैली तया
आदीयते सहृदयमनो-
रञ्जनविधावतिदक्ष या
दृष्ट्वैव तां स्वसखीं प्रियां
हृष्यतितरां सुरभारती ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७२. गेहं प्रत्यानयते

१ मदिरयति न कोकिलकुहूः सखे !
सुखयन्ति न वासन्ता वाताः
शशिना धवला रमयति न निशा
कर्षन्ति न मां हरितो हरिताः ।

२ शोकव्यथितामहमश्रुमुखीं
पश्यामि यदा भारतजननीं
ज्वालावलिवलितामवलोके
सकलां सृष्टिं सकलामवनीम् ।

३ अन्यादृशमिव वातावरणं
निखिले मम देशे संजातं
कोऽप्यत्र न कंचित्परिचिनुते
मित्रं कुरुते दारुणघातम् ।

४ आसन् मैत्रीबन्धनबद्धाः
ते सर्वे हा वैरायन्ते
साक्ष्यं दत्ते पञ्चाम्बुधरा
मृतिलास्यं ये च विलोकन्ते ।

५ सुषमाभवने मम काश्मीरे
दुर्वृत्तैः किं किं नाचरितं
रोदिति करुणा क्रन्दति ममता
घटयन्ती शोकानलसरितम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

६ काञ्चनहरिणेन समाकृष्टा
मातस्तव सुता गृहाद् दूरे
विहरन्ते स्वप्नमये लोके
धन-वैभव - सुख - शोभापूरे ।

७ स्वार्थान्धतमःपूरितहृदयाः
सत्यं नहि जातु विलोकन्ते
पदलाभमात्रचिन्तनपरभा
विदधति निष्ठाया लोपं ते ।

८ उपकारं तस्य परं मंस्ये
स ममादरभाजनतामयते
यो भारतमातृसुतान् भ्रान्तान्
नैजं गेहं प्रत्यानयते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७३. भातु वसुधा भारती

भातु वसुधा भारती
दधती नवाभाभां श्रियम् ।

१ यातु मोहनिशाऽवसानं
नवविभा राराजतां
ध्वंसतां वैरं मनस्तः
प्रेमभाचो भ्राजतां
लसतु बन्धुत्वं समाजे
प्रेरयन्मङ्गलधियम् ।

२ ज्ञानविज्ञानैः कलाभिः
या चिरेण सुमण्डिता
आत्मतत्त्वविवेचने
भूमौ विलक्षणपण्डिता
तत्र जाति-प्रान्त-भाषा-
भेदविषक्ल्यः कथम् ?

३ या निहन्त्री भक्तिशक्त्योः
ना श य त्य प्ये क तां
या मिथो वैराणि सूते
रिपुगणे प्रीतिं परां
भेदनीतिर्भेदनीया
भारतीयैः सा द्रुतम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ या विलुम्पति संस्कृतिं नः
वैरिणी परिचीयतां
या निधिं हरतेऽस्मदीयं
सा द्रुतं परिहीयतां
नैव संस्कृत्यङ्गना
परदेशजा दत्ते क्षणम् ।

५ कुत्रचिद् वीणाध्वनिः
हाहेति रुदितं वा भृशं
गर्वितः कश्चिद् घनैः
कोऽप्यत्र लभते नो कणं
खातमेतत् पूर्यतां
स्वोद्धारभावनयाऽचिरम् ।

६ अस्तमुपयातु द्रुतं खलु
खलजनानां खेलनं
त्रस्तमानवताऽवने स्या-
च्छक्ति-साहसमेलनं
उपनमति किं नो जगत्यां
यदि मनः स्थिरनिश्चयम् ।

७ पीयतामनुराग-
पीयूषं समादृत्यैकतां
स्वार्थपरतोत्सारणैः
मोदो मनस्याधीयतां
वंभवं नववेषभृत्
नित्यं प्रदत्तामुत्सवम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७४. आद्यं धर्मसाधनम्

आरोग्येण समानं किञ्चित्
नास्ति जगत्यभिरामम्
तदभावे हा नवयौवनमपि
नीरसमथ गतयामम् । १

आरोग्याभावे न याति किं
विमलवैदुषी व्यर्था
अमितधनस्य हितं प्रकुर्वते
किं विपुला अप्यर्थाः ? २

विना तेन लब्धुं नहि पार्याः
जगत्तले पुरुषार्थाः
भान्ति नीरसा इव जागतिकाः
भव्याः सकलपदार्थाः । ३

आरोग्यं नो लभते कश्चित्
भूषितभवने ह्यट्टे
क्रय्यं नापि धनैः क्वचिदेतत्
भद्राः ! भिषजां हट्टे । ४

स्वस्थवृत्तमाचर्यं मनुजैः
ऋषिभिर्ग्रन्थेषूक्तं
सर्वासां वाचां साहित्ये
मिलति सहस्रं सूक्तम् । ५

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आरोग्यं कामयसे मनसा
निवस विशुद्धे पवने
व्यायामैः कुर्वङ्गचालनम्
उद्याने वा विपिने । ६

ब्राह्ममुहूर्ते जागृहि रम्ये
विहितपरेशध्यानः
नैत्यिककर्म विदध्या विधिना
शुद्धौ कृतावधानः । ७

मा द्रुह्यः कस्मैचित् पुंसे
हितं परेषां कुर्याः
विमलमना भव कपटत्यागं
ब्रुवते नयविद्धुर्याः । ८

हितमुक् मितमुक् संयमसेवी
गो र स से व न र क्तः
आरोग्यं प्राप्नोत्यसंशयं
सत्याचरणे सक्तः । ९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

७५: जगदीशवन्दना

हे जगदीश विभो करुणाकर !
समे वयं त्वां शरणं यामः

१ अद्भुतरूपमयी रचना ते
विज्ञजनानपि विस्मापयते
प्रकृतिर्गूढरहस्यनिलीना
नित्यं नवनवमुद्भावयते
जानीषे त्वं त्वन्मनीषितं
मुग्धास्त्वां कथमवबोधामः ?

२ परमकौतुकी त्वं लीलामय !
लीलया विनिर्मासि जगन्ति
तान्यदृश्याकर्षणसूत्रैः
संग्रथितान्यद्भुतं लसन्ति
सूर्य-चन्द्र-तारासु तावकं
ज्योतिर्मयरूपं पश्यामः ।

३ छादनमिव विश्वस्य विशालं
आस्तृतमेतद् व्योमवितानं
अन्नजलैः फलखनिजैः पूर्णा
वसुधात्री भजते प्रथिमानं
वर्णशबलतां रचनापटुतां
कुत्र न सृष्टौ संपश्यामः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

४ विश्वनाट्यरङ्गे बहुरूपा
अवतारयसे मानवमूर्तीः
ताभिः कस्य तवोद्देश्यस्य
भवति विभो ! का का सम्पूर्तिः
वेत्सि त्वं तावकचरितानि
किं विद्मः किं वा प्रवदामः ?

५ बालनिवेदनमेतत् प्रभुवर !
अस्मानव निजमायाबन्धात्
देहि सुनीतिं धेहि च करुणां
मा विश्लेषय तव सम्बन्धात्
स्तुतिमर्चां ते नो जानीमः
कृपां केवलां ते वाञ्छामः ।

७ प्रकीर्णपुष्पपरागः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन्मः २

स्थानः अ

शिक्षाः ए
सा

सम्प्रति शि

रचनाएं गी
क्षु
का
लेख

सम्प्राप्तिः अ
वा
(१
भा
द्वा
रा

आवास डी-
दिल

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.